# Shrirama Karnamritam

# શ્રીરામકર્ણામૃતમ્

## Document Information

Text title : rAmakarNAmRRitam

File name : rAmakarNAmRRitam.itx

Category : raama

Location : doc_raama

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : March 10, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીરામકર્ણામૃતમ્

શ્રીરામાય નમઃ

## પ્રથમાશ્વાસઃ

શ્રીરામં ત્રિજગદ્ગુરું સુરવરં સીતામનોનાયકં
 શ્યામાઙ્ગં શશિકોટિમઞ્જુવદનં વક્ષોલ્લસત્કૌસ્તુભમ્ ।
સૌમ્યં સત્વગુણોત્તમં સુસરયૂતીરે વસન્તં પ્રભું
 ત્રાતારં સકલાર્થસિદ્ધિસહિતં વન્દે રઘૂણાં પતિમ્ ॥ ૧॥

શ્રીરાઘવં દશરથાત્મજમપ્રમેયં
 સીતાપતિં રઘુવરાન્વયરત્નદીપમ્ ।
આજાનુબાહુમરવિન્દદલાયતાક્ષં
 રામં નિશાચરવિનાશકરં નમામિ ॥ ૨॥

શ્રીરામં બલવૈરિનીલચિકુરં સ્મેરાનનં શ્યામલં
 કર્ણાન્તાયતલોચનં સુરવરં કારુણ્યપાથોનિધિમ્ ।
શોણામ્ભોરુહપાદપલ્લવયુગં ક્ષોણીતનૂજાયુતં
 રાજત્કુણ્ડલગણ્ડભાગયુગલં રામં સદાઽહં ભજે ॥ ૩॥

શ્રીરામં જગદેકવીરમમલં સીતામનોરઞ્જનં
 કૌસલ્યાવરનન્દનં રઘુપતિં કાકુત્સ્થવંશોદ્ભવમ્ ।
લોકાનામભિરામમઙ્ગલધનવ્યાપારપારાયણં
 વન્દેઽહં જનઘોરપાપનિકરધ્વંસં વિભું રાઘવમ્ ॥ ૪॥

શ્રીરામં જગદીશ્વરં જનકજાજાનિં જનાનન્દનં
 જન્તૂનાં જનકં જનાર્તિહરણં લોકેશ્વરં શાશ્વતમ્ ।
જાબાલાદિમુનીશ્વરૈઃ પરિવૃતં જાજ્જ્વલ્યમાનં સદા
 જઙ્ઘાલં જમદગ્નિસૂનુહરણં જાતાનુકમ્પં ભજે ॥ ૫॥

શ્રીરામો રઘુનાયકો રઘુવરો રાજીવનેત્રાઞ્ચિતો
રાજેન્દ્રો રઘુપુઙ્ગવો રઘુકુલોત્તંસો રઘૂણાં પતિઃ ।
રામો રાક્ષસનાશનોઽમિતબલો રાકેન્દુપૂર્ણાનનો
રાજત્કિઙ્કિણિકઙ્કણાઙ્કિતકરો રામસ્સદા પાતુ નઃ ॥ ૬॥

શ્રીરામચન્દ્ર કરુણાકર રાઘાવેન્દ્ર
રાજેન્દ્રચન્દ્ર રઘુવંશસમુદ્રચન્દ્ર ।
સુગ્રીવનેત્રયુગલોત્પલપૂર્ણચન્દ્ર
સીતામનઃકુમુદચન્દ્ર નમો નમસ્તે ॥ ૭॥

શ્રીરામં કરુણાકરં ગુણનિધિં સીતાપતિં શાશ્વતં
પારાવારગભીરમબ્જનયનં પ્રાવૃડ્ (ભ્રાજદ્) ઘનશ્યામલમ્ ।
વીરશ્રેષ્ઠમનામયં વિજયિનં વિશ્વપ્રકાશાત્મકં
ઘોરારિપ્રકરાધિકપ્રહરણં કોદણ્ડરામં ભજે ॥ ૮॥

શ્રીરામચન્દ્રેતિ સલક્ષ્મણેતિ નીલોત્પલશ્યામલકોમલેતિ ।
આક્રોશતામસ્ત્વધુનૈવ જિહ્વા સીતાપતે રાઘવ રાઘવેતિ ॥ ૯॥

શ્રીરામચન્દ્રે રમતાં મનો મે રમાઙ્ગવામે વિપદાં વિરામે ।
જિતારિરામે પ્રણતારિરામે ગુણાભિરામે ભુવનૈકરામે ॥ ૧૦॥

શ્રીરામચન્દ્ર રઘુપુઙ્ગવ રાજવર્ય
રાજેન્દ્રરાજ સુરનાયક રાઘવેશ ।
રાજાધિરાજ રઘુનન્દન રામભદ્ર
દાસોઽસ્મ્યહં ચ ભવતઃ શરણાગતોઽસ્મિ ॥ ૧૧॥

શ્રીરામં સરસીરુહાક્ષમમલં દૂર્વાઙ્કુરશ્યામલં
વિદ્યુત્કોટિનિભપ્રભામ્બરધરં વીરાસનાધિષ્ઠિતમ્ ।
વામાઙ્કોપરિ સંસ્થિતાં જનકજામાલિઙ્ગ્ય તાં બાહુના
તત્ત્વં ચાપરપાણિના મુનિગણાનાજ્ઞાપયન્તં ભજે ॥ ૧૨॥

શ્રીરામઃ સકલેશ્વરો મમ પિતા માતા ચ સીતા મમ
ભ્રાતાઽજશ્ચ સખા પ્રભઞ્જનસુતઃ પત્ની વિરક્તિઃ પ્રિયા ।
વિશ્વામિત્રવિભીષણપ્રભૃતયો મિત્રાણિ બોધઃ સુતો
ભક્તિઃ શ્રીહરિસઙ્ગતા રતિસુખં વૈકુણ્ઠમસ્મત્પદમ્ ॥ ૧૩॥

શ્રીરામામલપુણ્ડારીકનયન શ્રીરામ સીતાપતે

ગોવિન્દાચ્યુત નન્દનન્દન મુકુન્દાનન્દ દામોદર ।
વિષ્ણો રાઘવ વાસુદેવ નૃહરે દેવૌઘચૂડામણે
સંસારાર્ણવકર્ણધારક હરે કૃષ્ણાય તુભ્યં નમઃ ॥ ૧૪॥

રામં લક્ષ્મણપૂર્વજં રઘુવરં સીતાપતિં સુન્દરં
કાકુત્સ્થં કરુણાકરં ગુણનિધિં વિપ્રપ્રિયં ધાર્મિકમ્ ।
રાજત્કુણ્ડલમણ્ડિતાનનરુચિં રાત્રિઞ્ચરધ્વંસિનં
શમ્પાકોટિસમાનકાન્તિવિલસન્માયામૃગઘ્નં ભજે ॥ ૧૫॥

રામં રત્નકિરીટકુણ્ડલધરં કેયૂરહારાન્વિતં
સીતાલઙ્કૃતવામભાગમમલં સિંહાસનસ્થં પ્રભુમ્ ।
સુગ્રીવાદિસમસ્તવાનરનુતં સંસેવ્યમાનં સદા
વિશ્વામિત્રપરાશરાદિમુનિભિઃ સંસ્તૂયમાનં ભજે ॥ ૧૬॥

રામઃ સીતાસમેતો નિવસતુ હૃદયે સાનુજં રામમીડે
રામેણ ક્ષીણપાપસ્ત્રિવિધમપિ કૃતં કર્મ રામાય દદ્યામ્ ।
રામાદન્યં ન જાને ન હિ કિમપિ મહારામનામ્નઃ સમાનં
રામે પશ્યામિ વિશ્વં ભુવનમનુદિનં પાહિ માં વીરરામ ॥ ૧૭॥

રામં રાજશિખામણિં રઘુપતિં દેવારિદર્પાપહં
લોકાનાં હિતકારિણં ગુણનિધિં કારુણ્યપુણ્યોદયમ્ ।
મુક્તાવિદ્રુમરત્નશોભિતતનું સૌન્દર્યહસ્તામ્બુજં
કૌસલ્યાતનયં ભજામિ સતતં શ્રેજાનકીનાયકમ્ ॥ ૧૮॥

રામં વીરાસનસ્થં હૃદયગતકરોદઞ્ચિતજ્ઞાનમુદ્રં
જાનુન્યાસક્તહસ્તં ક્ષિતિવરતનયાભૂષિતં વામભાગે ।
ષટ્કોણે વ્યાહરન્તં પવનસુતયુતં માનસે માનયન્તં
સુગ્રીવે સેવ્યમાને દૃઢશરધનુષા દક્ષિણે લક્ષ્મણેન ॥ ૧૯॥

રામં સૌમિત્રિમિત્રં રઘુપતિમમલં રામચન્દ્રં રમેશં
રમ્યં શ્રીરાઘવેશં શુભલલિતમુખં શુદ્ધસત્ત્વં સુવીરમ્ ।
સીતાસૌન્દર્યપાત્રં સુરમુનિવિનુતં નીલમિન્દીવરાભં
વન્દે વન્દારુપાલં રજનિચરહરં રમ્યકોદણ્ડરામમ્ ॥ ૨૦॥

રામં ચન્દનશીતલં ક્ષિતિસુતામોહાકરં શ્રીકરં
વૈદેહીનયનારવિન્દમિહિરં સમ્પૂર્ણચન્દ્રાનનમ્ ।
રાજાનં કરુણાસમેતનયનં સીતામનઃસ્યન્દનં

સીતાદર્પણચારુગણ્ડલલિતં વન્દે સદા રાઘવમ્ ॥ ૨૧॥

રામં શ્યામાભિરામં રવિશશિનયનં કોટિસૂર્યપ્રકાશં
દિવ્યં દિવ્યાસ્ત્રપાણિં શરમુખશરધિં ચારુકોદણ્ડહસ્તમ્ ।
કાલં કાલાગ્નિરુદ્રં રિપુકુલદહનં વિઘ્નવિચ્છેદદક્ષં
ભીમં ભીમાટ્ટહાસં સકલભયહરં રામચન્દ્રં ભજેઽહમ્ ॥ ૨૨॥

રામચન્દ્રચરિતં કથામૃતં લક્ષ્મણાગ્રજગુણાનુકીર્તનમ્ ।
રાઘવેશ તવ પાદસેવનં સમ્ભાવન્તુ મમ જન્મજન્મનિ ॥ ૨૩॥

રામો મત્કુલદૈવતં સકરુણં રામં ભજે સાદરં
રામેણાખિલઘોરપાપરહિતો રામાય તસ્મૈ નમઃ ।
રામાન્નાસ્તિ જગત્ત્રયૈકસુલભો રામસ્ય દાસોઽસ્મ્યહં
રામે પ્રીતિરતીવ મે કુલગુરો શ્રીરામ રક્ષસ્વ મામ્ ॥ ૨૪॥

શ્રીરામચન્દ્ર તવ કીર્તિસુરદ્રુમસ્ય
તારાગણસ્સુમનસઃ ફલમિન્દુબિમ્બમ્ ।
મૂલં મહાફણિપદં ગગનં ચ મધ્યં
સર્વા દિશો ભુવનમણ્ડલમાલવાલમ્ ॥ ૨૫॥

વૈદેહીં મુદિતાભિજાતપુલકાં ગાઢં સમાલિઙ્ગયન્
વામેન સ્તનચૂચુકં પુલકિતં વામં કરેણ સ્પૃશન્ ।
તત્ત્વં દક્ષિણપાણિના કલિતયા ચિન્મુદ્રયા બોધયન્
રામો મારુતિસેવિતઃ સ્મરતુ માં સામ્રાજ્યસિંહાસને ॥ ૨૬॥

વામાઙ્કસ્થિતજાનકીં પરિલ(ર)સત્કોદણ્ડદણ્ડં કરે
ચક્રં ચોર્ધ્વકરેણ બાહુયુગલે શઙ્ખં શરં દક્ષિણે ।
વિભ્રાણં જલજાતપત્રનયનં ભદ્રાદ્રિમૂર્ધ્નિ સ્થિતં
કેયૂરાદિવિભૂષિતં રઘુપતિં રામં ભજે શ્યામલમ્ ॥ ૨૭॥

વામે ભૂમિસુતા પુરસ્તુ હનુમાન્પશ્ચાત્સુમિત્રાસુતઃ
શત્રુઘ્નો ભરતશ્ચ પાર્શ્વદલયોર્વાય્વાદિકોણેષ્વપિ ।
સુગ્રીવશ્ચ વિભીષણશ્ચ યુવરાટ્ તારાસુતો જામ્બવાન્
મધ્યે નીલસોરજકોમલરુચિં રામં ભજે શ્યામલમ્ ॥ ૨૮॥

વૈદેહીસહિતં સુરદ્રુમતલે હૈમે મહામણ્ડપે
મધ્યેપુષ્પકમાસને મણિમયે વીરાસને સુસ્થિતમ્ ।

અગ્રે વાચયતિ પ્રભઞ્જનસુતે તત્ત્વં મુનિભ્યઃ પરં
વ્યાખ્યાન્તં ભરતાદિભિઃ પરિવૃતં રામં ભજે શ્યામલમ્ ॥ ૨૯॥

વૈદેહીં પરિરભ્ય જાતપુલકાં લજ્જાવતીં સુસ્મિતાં
કાઞ્ચીનૂપુરહારકઙ્કણલસત્કર્ણાવતંસોજ્જ્વલામ્ ।
કસ્તૂરીઘનસારચર્ચિતકુચાં ચન્દ્રાનનાં શ્યામલં
કન્દર્પાધિકસુન્દરં રઘુપતિં શ્રીરામચન્દ્રં ભજે ॥ ૩૦॥

વૈદેહીરમણં વિભીષણવિભું વિષ્ણુસ્વરૂપં હરિં
વિશ્વોત્પત્તિવિપત્તિપોષણકરં વિદ્યાધરૈરર્ચિતમ્ ।
વૈરિધ્વંસકરં વિરિઞ્ચિજનકં વિશ્વાત્મકં વ્યાપકં
વ્યાસાઙ્ગીરસનારદાદિવિનુતં વન્દામહે રાઘવમ્ ॥ ૩૧॥

મૈથિલ્યા નગરે વિવાહસમયે કલ્યાણવેદ્યન્તરે
સામન્તે વિમલેન્દુરત્નખચિતે પીઠે વસન્તૌ શુભે ।
શ◌ૃણ્વન્તૌ નિગમાર્થવેદિવિદુષામાશીર્ગિરો રાજિતૌ
પાયાસ્તાં સુવધૂવરૌ રઘુપતી શ્રીજાનકીરાઘવૌ ॥ ૩૨॥

અસિતકમલભાસા ભાસયન્તં ત્રિલોકં
દશરથકુલદીપં દૈવતામ્ભોજભાનુમ્ ।
દિનકરકુલબાલં દિવ્યકોદણ્ડપાણિં
કનકખચિતરત્નાલઙ્કૃતં રામમીડે ॥ ૩૩॥

સુસ્નિગ્ધં નીલકેશં સ્ફુટમધુરમુખં સુન્દરભ્રૂલલાટં
દીર્ઘાક્ષં ચારુનાસાપુટમમલમણિશ્રેણિકાદન્તપઙ્ક્તિમ્ ।
વિમ્બોષ્ઠં કમ્બુકણ્ઠં કઠિનતરમહોરસ્કમાજાનુબાહું
મુષ્ટિગ્રાહ્યાવલગ્નં પૃથુજઘનમુદારોરુજઙ્ઘાઙ્ઘ્રિમીડે ॥ ૩૪॥

વન્દામહે મહેશાનચણ્ડકોદણ્ડખણ્ડનમ્ ।
જાનકીહૃદયાનન્દચન્દનં રઘુનન્દનમ્ ॥ ૩૫॥

જાનાતિ રામ તવ નામરુચિં મહેશો
જાનાતિ ગૌતમસતી ચરણપ્રભાવમ્ ।
જાનાતિ દોર્બલપરાક્રમમીશચાપો
જાનાત્યમોઘપટુબાણગતિં પયોધિઃ ॥ ૩૬॥

દિવ્યસ્યન્દનમધ્યગં રણરણચ્ચાપાન્વિતં ભીષણં

કાલાગ્નિપ્રતિમાનબાણકલિતં ઘોરાસ્ત્રતૂણીદ્વયમ્ ।
સુગ્રીવાઙ્ગદરાવણાનુજમરુત્પુત્રાદિસંસેવિતં
રામં રાક્ષસવીરકોટિહરણં રક્તામ્બુજાક્ષં ભજે ॥ ૩૭॥

બ્રહ્માદ્યામરસિદ્ધજન્મભવનં યન્નાભિપઙ્કેરુહં
શ્રીનિર્વાણનિકેતનં યદુદરં લોકૈકશય્યાગૃહમ્ ।
યદ્વક્ષઃ કમલાવિલાસભવનં યન્નામ મન્ત્રં સતાં
વાસાગારમખણ્ડમણ્ડલનિધિઃ પાયાત્સ વો રાઘાવઃ ॥ ૩૮॥

શ‌ૃઙ્ગારં ક્ષિતિનન્દિનીવિહરણે વીરં ધનુર્ભઞ્જને
કારુણ્યં બલિભઞ્જનેઽદ્ભુતરસં સિન્ધૌ ગિરિસ્થાપને ।
હાસ્યં શૂર્પણખામુખે ભયવહે બીભાત્સમાન્યામુખે
રૌદ્રં રાવણમર્દને મુનિજને શાન્તં વપુઃ પાતુ નઃ ॥ ૩૯॥

માતા રામો મત્પિતા રામચન્દ્રો
ભ્રાતા રામો મત્સખા રાઘવેશઃ ।
સર્વસ્વં મે રામચન્દ્રો દયાલુઃ
નાન્યં દૈવં નૈવ જાને ન જાને ॥ ૪૦॥

મૂલે કલ્પદ્રુમસ્યાખિલમણિવિલસદ્રત્નસિંહાસનસ્થં
કોદણ્ડદ્વન્દ્વબાણૈર્લલિતકરયુગેનાર્પિતં લક્ષ્મણેન ।
વામાઙ્કન્યસ્તસીતં ભરતધૃતમહામૌક્તિકચ્છત્રકાન્તિં
શત્રુઘ્નં ચામરાભ્યાં વિલસિતમનિશં રામચન્દ્રં ભજેઽહમ્ ॥ ૪૧॥

વામે કોદણ્ડદણ્ડં નિજકરકમલે દક્ષિણે બાણમેકં
પશ્ચાદ્ભાગે ચ નિત્યં દધદભિમતં  સાચિતૂણીરભારમ્ ।
વામેઽવામે લસદ્ભ્યાં સહ મિલિતતનું જાનકીલક્ષ્મણાભ્યાં
રામં શ્યામં ભજેઽહં પ્રણતજનમનઃખેદવિચ્છેદદક્ષમ્ ॥ ૪૨॥

આમ્ભોધરશ્યામલમમ્બુજાક્ષં ધનુર્ધરં વીરજટાકલાપમ્ ।
પાર્શ્વદ્વયે લક્ષ્મણમૈથિલીભ્યાં નિષેવ્યમાણં પ્રણમામિ રામમ્ ॥ ૪૩॥

કોદણ્ડદીક્ષાગુરુમપ્રમેયં સલક્ષ્મણં દાશરથિં દયાલુમ્ ।
આજાનુબાહું જગદેકવીરં અનાથનાથં રઘુનાથમીડે ॥ ૪૪॥

કર્પૂરાઙ્ગવિલેપનં રઘુવરં રાજીવનેત્રં પ્રભું
કસ્તૂરીનિકરાકૃતિં ખરધૃતિપ્રધ્વંસિનં શ્રીહરિમ્ ।

કન્દર્પાયુતકોટિસુન્દરતનું કામારિસેવ્યં ગુરું
    કાન્તાકામદમપ્રમેયમમલં સીતાસમેતં ભજે ॥ ૪૫॥

નીલાબ્દ(બ્જ) વૃન્દસદૃશં પરિપૂર્ણદેહં
    દિક્પાલકાદિસુરસેવિતપાદપદ્મમ્ ।
પીતામ્બરં કનકકુણ્ડલશોભિતાઙ્ગં
    સીતાપતિં રઘુપતિં સતતં ભજામિ ॥ ૪૬॥

ભર્ગબ્રહ્મસુરેન્દ્રમુખ્યદિવિજપ્રાગ્ચત્કિરીટાગ્રસં
    સર્ગાનેકમણિપ્રભાકરસહસ્રાભં પદામ્ભોરુહે ।
દુર્ગાસન્તતસંસ્તુતાઙ્ઘ્રિકમલં દુર્વારકોદાણ્ડિનં
    ગઙ્ગાસંસ્ફુટમૌલિમાનસહરં કલ્યાણરામં ભજે ॥ ૪૭॥

અગ્રે પ્રાઞ્જલિમાઞ્જનેયમનિશં વીરં ચ તારાસુતં
    પાર્શ્વે પઙ્ક્તિમુખાનુજં પરિસરે સુગ્રીવમગ્રાસને ।
પશ્ચાલ્લક્ષ્મણમન્તિકે જનકજાં મધ્યે સ્થિતં રાઘવં
    ચિન્તાતૂલિકયા લિખન્તિ સુધિયશ્ચિત્તેષુ પીતામ્બરમ્ ॥ ૪૮॥

ક્ષીરામ્ભોનિધિમધ્યવર્તિનિ સિતે દ્વીપે સુવર્ણાચલે
    રત્નોલ્લાસિતકલ્પભૂરુહતલે જામ્બૂનદે મણ્ડપે ।
તેજોભ્રાજિતવેદિકે સુરુચિરે માણિક્યસિંહાસને
    હેમામ્ભોરુહકર્ણિકોપરિતલે વીરાસનસ્થં ભજે ॥ ૪૯॥

દૌર્દણ્ડૈકકમણ્ડલીકૃતમહાકોદણ્ડચણ્ડાશુગૈઃ
    નિર્ઘાતૈ રવિકોટિતુલ્યનિશિતૈર્બ્રહ્માદિમુખ્યસ્તુતૈઃ ।
સુગ્રીવાદિસમસ્તવાનરવરાનાજ્ઞાપયન્તં ગિરા
    તત્ત્વં તાડય તાડયેત્યનુપદં શ્રીરામચન્દ્રં ભજે ॥ ૫૦॥

ભૂકમ્પં જનયન્નભો વિદલયન્નમ્ભોનિધિં ક્ષોભયન્
    દૈતેયાંશ્ચ વિમર્દયન્ ગિરિવરાન્ ભિન્દન્ દિશઃ પૂરયન્ ।
વૈદેહીમપિ મોદયન્ સકલગીર્વાણાન્ શિરઃ કમ્પયન્
    કલ્યાણો રઘુરામબાણવિલસત્કોદણ્ડચણ્ડધ્વનિઃ ॥ ૫૧॥

વિમલકમલનેત્રં વિસ્ફુરન્નીલગાત્રં
    તપનકુલપવિત્રં દાનવધ્વાન્તમિત્રમ્ ।
ભુવનશુભચરિત્રં ભૂમિપુત્રીકલત્રં
    દશરથવરપુત્રં નૌમિ રામાખ્યમિત્રમ્ ॥ ૫૨॥

જનની જાનકી સાક્ષાજ્જનકો રઘુનન્દનઃ ।
લક્ષ્મણો મિત્રમસ્માકં કો વિચારઃ કુતો ભયમ્ ॥

જનકો રામચન્દ્રો મે જનની જનકાત્મજા ।
હનુમત્પ્રમુખાસ્સર્વે હરયો મમ બાન્ધવાઃ ॥ ૫૩॥

જગતિ વિશદમન્ત્રં જાનકીપ્રાણમન્ત્રં
    વિબુધવિનુતમન્ત્રં વિશ્વવિખ્યાતમન્ત્રમ્ ।
દશરથસુતમન્ત્રં દૈત્યસંહારમન્ત્રં
    રઘુપતિનિજમન્ત્રં રામરામેતિ મન્ત્રમ્ ॥ ૫૪॥

સીતાયા દક્ષિણે પાર્શ્વે લક્ષ્મણસ્ય ચ પાર્શ્વતઃ ।
તન્મધ્યે રાઘવં વન્દે ધનુર્બાણધરં હરિમ્ ॥ ૫૫॥

ચન્દ્રોપમં મલયચન્દનચર્ચિતાઙ્ગં
    મન્દારપુષ્પભરપૂજિતપાદપદ્મમ્ ।
બ્રહ્મેન્દ્રવન્દ્યમનિશં મુનિવૃન્દસેવ્યં
    વન્દેઽરવિન્દનયનં રઘુરામચન્દ્રમ્ ॥ ૫૬॥

બ્રહ્મામૃતાનન્દફલપ્રદાયિનં વેદાન્તવિજ્ઞાનસુગન્ધપુષ્પિતમ્ ।
સીતાશુભાઙ્ગાચિતબાહુશાખિનમ્ શ્રીરામકલ્પદ્રુમમાશ્રયામઃ ॥ ૫૭॥

કનકનિકષભાસા સીતયાલિઙ્ગિતાઙ્ગો
    નવકુવલયધામશ્યામવર્ણોઽભિરામઃ ।
અભિનવયુતવિદ્યુન્નન્દિતો મેઘષણ્ડઃ
    શમયતુ મમ તાપં સર્વદા રામચન્દ્રઃ ॥ ૫૮॥

અલં શાસ્ત્રાભ્યાસૈરલમસકૃદામ્નાયપઠનૈઃ
    અલં તીર્થસ્નાનૈરલમખીલયાગવ્રતજપૈઃ ।
અલં યોગાભ્યાસૈરલમપિ મહાપાતકધિયા
    યદસ્માકં રામસ્મરણમહિમા સા વિજયતે ॥ ૫૯॥

સીતામનોમાનસરાજહંસ સંસારસન્તાપહર ક્ષમાલો ।
શ્રીરામ દૈત્યાન્તક શાન્તરૂપ શ્રીતારકબ્રહ્મ નમો નમસ્તે ॥ ૬૦॥

કદા વા સાકેતે વિમલસરયૂતીરપુલિને
    સમાસીનઃ શ્રીમદ્રઘુપતિપદાબ્જે હૃદિ ભજન્ ।

અયે રામ સ્વામિન્ જનકતનયાવલ્લભ વિભો
    પ્રસીદેતિ ક્રોશન્નિમિષમિવ નેષ્યામિ દિવસાન્ ॥ ૬૧॥

કદા વા સાકેતે તરુણતુલસીકાનનવને
    નિવિષ્ટં તં પશ્યન્ સુરુચિરવિશાલોર્ધ્વતિલકમ્ ।
અયે સીતાનાથ સ્મૃતિજનપતે દાનવજયિન્
    પ્રસીદેતિ ક્રોશન્નિમિષમિવ નેષ્યામિ દિવસાન્ ॥ ૬૨॥

કદા વા સાકેતિ મણિખચિતસિંહાસનતલે
    સમાસીનં રામં જનકતનયાલિઙ્ગિતતનુમ્ ।
અયે સીતારામ ત્રુટિતહરધન્વિન્ રાઘુપતે
    પ્રસીદેતિ ક્રોશન્નિમિષમિવ નેષ્યામિ દિવસાન્ ॥ ૬૩॥

માર્ગે માર્ગે શાખિનાં રત્નવેદી
    વેદ્યાં વેદ્યાં કિન્નરીવૃન્દગીતમ્ ।
ગીતે ગીતે જઞ્જુલાલાપગોષ્ઠી
    ગોષ્ઠે ગોષ્ઠે ત્વત્કથા રામચન્દ્ર ॥ ૬૪॥

વૃક્ષે વૃક્ષે વીક્ષિતાઃ પક્ષિસઙ્ઘાઃ
    સઙ્ઘે સઙ્ઘે મઞ્જુલામોદવાક્યમ્ ।
વાક્યે વાક્યે મઞ્જુલાલાપગોષ્ઠી
    ગોષ્ઠ્યાં ગોષ્ઠ્યાં ત્વત્કથા રામચન્દ્ર ॥ ૬૫॥

શ્વેતપુષ્પકમારુહ્ય સીતયા સહ રાઘવ ।
સુગ્રીવાદિભવદ્ભક્તૈર્મનોમધ્યે રમસ્વ મે ॥ ૬૬॥

દોર્ભિઃ ખડ્ગં ત્રિશૂલં ડમરુમસિધનુશ્ચારુબાણં કુઠારં
    શઙ્ખં ચક્રં ચ ખેટં હલમુસલગદાભિણ્ડાપાલં ચ પાશમ્ ।
વિદ્યુદ્વલ્લી ચ મુષ્ટિં ત્વભયવરકરં બિભ્રતં શુભ્રવર્ણં
    વન્દે રામં ત્રિનેત્રં સકલરિપુકુલં મર્દયન્તં પ્રતાપૈઃ ॥ ૬૭॥

દુરિતતિમિરચન્દ્રો દુષ્ટકઞ્જાતચન્દ્રઃ
    સુરકુવલયચન્દ્રઃ સૂર્યવંશાબ્ધિચન્દ્રઃ ।
સ્વજનનિવહચન્દ્રઃ શત્રુરાજીવચન્દ્રઃ
    પ્રણતકુમુદચન્દ્રઃ પાતુ માં રામચન્દ્રઃ ॥ ૬૮॥

કલ્યાણદં કૌશિકયજ્ઞપાલં કલાનિધિં કાઞ્ચનશૈલધીરમ્ ।

કઞ્જાતનેત્રં કરુણાસમુદ્રં કાકુત્સ્થરામં કલયામ ચિત્તે ॥ ૬૯॥

વાલ્મીકિસ્મૃતિમન્દરેણ મથિતસ્સીતારમાસમ્ભવઃ
સુગ્રીવામરભૂરુહોઽઙ્ગદગજઃ સૌમિત્રિચન્દ્રોદયઃ ।
વાતોત્પન્નમણિર્વિભીષણસુધઃ પૌલસ્ત્યહાલાહલઃ ।
શ્રીરામાયણદુગ્ધવાર્ધિરમલો ભૂયાત્સુખશ્રેયસે ॥ ૭૦॥

રઘુનન્દન એવ દૈવતં નો રઘુવંશોદ્ભવ એવ દૈવતં નઃ ।
ભરતાગ્રજ એવ દૈવતં નો ભગવાન્ રાઘવ એવ દૈવતં નઃ ॥ ૭૧॥

ઉત્ફુલ્લામલકોમલોત્પલદલશ્યામાય રામામન-
શ્ચન્દ્રાય પ્રશમાય નિર્મલગુણારામાય રામાત્મને ।
ધ્યાનારૂઢમુનીન્દ્રમાનસસરોહંસાય સંસારવિ-
ધ્વંસાયાદ્ભુતતેજસે રઘુકુલોત્તંસાય પુંસે નમઃ ॥ ૭૨॥

રાજીવાયતલોચનં રઘુવરં નીલોતપલશ્યામલં
મન્દારાઞ્ચિતમણ્ડપે સુલલિતે સૌવર્ણકે પુષ્પકે ।
આસ્થાને નવરત્નરાજિખચિતે સિંહાસને સંસ્થિતં
સીતાલક્ષ્મણલોકપાલસહિતં વન્દે મુનીન્દ્રાસ્પદમ્ ॥ ૭૩॥

વલ્લીપ્રવાલનવપલ્લવપાદપદ્મં
કઞ્જેક્ષણં જલજનીલસરોરુહાભમ્ ।
સીમન્તિનીનયનમોહનમૂલમન્ત્રં
રામં નમામિ મુનિમાનસરાજહંસમ્ ॥ ૭૪॥

અલં વિવાદેન ન માનુષોઽયં રામાત્મના રાક્ષસમર્દનાય ।
ભુજઙ્ગશય્યાં પરિમુચ્ય સાક્ષાન્નારાયણો ભૂતલમાજગામ ॥ ૭૫॥

લોકત્રાણાનુકારી દશવદનશિરઃપઙ્ક્તિવિચ્છેદકારી
લઙ્કાલઙ્કારહારી ભૃગુતનયમનસ્સર્વગર્વાપહારી ।
સીતાસીમન્તકારી મણિમયમુકુટો દિવ્યકોદણ્ડધારી
શ્રીરામઃ પાપહારી શમયતુ દુરિતં ભૂમિભારાપહારી ॥ ૭૬॥

બ્રહ્માદિયોગમુનિપૂજિતસિદ્ધમન્ત્રં
દારિદ્ર્યદુઃખભવરોગવિનાશમન્ત્રમ્ ।
સંસારસાગરસમુત્તરણૈકમન્ત્રમ્ ।
વન્દે મહાભયહરં રઘુરામમન્ત્રમ્ ॥ ૭૭॥

શત્રુચ્છેદૈકમન્ત્રં સરસમુપનિષદ્વાક્યસમ્પૂજ્યમન્ત્રં
સંસારોત્તારમન્ત્રં સમુચિતસમયે સઙ્ગનિર્વાણમન્ત્રમ્ ।
સર્વૈશ્વર્યૈકમન્ત્રં વ્યસનભુજગસન્દષ્ટસન્ત્રાણમન્ત્રં
જિહ્વાશ્રીરામમન્ત્રં જપતુ જપતુ મે જન્મસાફલ્ય મન્ત્રમ્ ॥ ૭૮॥

આકર્ણમારૂઢધનુર્ગુણાઢ્યં બ્રહ્માસ્ત્રમુણ્ડીકૃતરાક્ષસેન્દ્રમ્ ।
રથાધિરૂઢં રણરઙ્ગધીરં રામં ભજે રક્તસરોરુહાક્ષમ્ ॥ ૭૯॥

એતૌ તૌ દશકણ્ઠકણ્ઠકદલીકાન્તારકાન્તિચ્છિદૌ
વૈદેહીકુચકુમ્ભકુઙ્કુમરજઃ પઙ્કારુણાલઙ્કૃતૌ ।
વિશ્વત્રાણનિદાનસાધુસરસપ્રારમ્ભયૂપૌ ભુજૌ
દેયાસ્તામુરુવિક્રમૌ રઘુપતેઃ શ્રેયાંસિ ભૂયાંસિ નઃ ॥ ૮૦॥

વામાઙ્કોપરિ સંસ્થિતાવનિસુતામામુક્તભૂષોજ્જ્વલાં
પશ્યન્તં પરિપૂર્ણચન્દ્રવદનં ભ્રાજત્કિરીટોજ્જ્વલમ્ ।
આસીનં નવરત્નરાજિખચિતે સિંહાસને રાઘવં
સુગ્રીવાઙ્ગદલક્ષ્મણાનિલસુતૈરાસેવ્યમાનં ભજે ॥ ૮૧॥

જાનક્યાઃ કમલામલાઞ્જલિપુટે યાઃ પદ્મરાગાયિતાઃ
ન્યસ્તા રાઘવમસ્તકે તુ વિલસત્કુન્દપ્રસૂનાયિતાઃ ।
સ્રસ્તાઃ શ્યામલકાયકાન્તિકલિતાઃ યા ઇન્દ્રનીલાયિતાઃ
મુક્તાસ્તાશ્શુભદા ભવન્તુ ભવતાં શ્રીરામવૈવાહિકાઃ ॥ ૮૨॥

નિત્યં શ્રીરામમન્ત્રં નિરુપમમધિકં નીતિસુજ્ઞાનમન્ત્રં
સત્યં શ્રીરામમન્ત્રં સદમલહૃદયે સર્વદાઽઽરોગ્યમન્ત્રમ્ ।
સ્તુત્યં શ્રીરામમન્ત્રં સુલલિતસુમનઃ સૌખ્યસૌભાગ્યમન્ત્રં
પઠ્યં શ્રીરામમન્ત્રં પવનજવરદં પાતુ માં રામમન્ત્રમ્ ॥ ૮૩॥

વ્યામોહપ્રશમૌષધં મુનિમનોવૃત્તિપ્રવૃત્ત્યૌષધં
દૈત્યોન્મૂલકરૌષધં ભવભયપ્રધ્વંસનૈકૌષધમ્ ।
ભક્તાનન્દકરૌષધં ત્રિભુવને સઞ્જીવનૈકૌષધં
શ્રેયઃ પ્રાપ્તિકરૌષધં પિબ મનઃ શ્રીરામનામૌષધમ્ ॥ ૮૪॥

ધ્યાયેત્પ્રાતઃ સુરેશં રવિકુલતિલકં રઞ્જિતાનન્તલોકં
બાલં બાલારુણાક્ષં ભવમુખવિનુતં ભાવગમ્યં ભવઘ્નમ્ ।
દીપ્યન્તં સ્વર્ણક્લૃપ્તૈર્મણિગણનિકરૈર્ભૂષણૈરુજ્જ્વલાઙ્ગં
કૌસલ્યાદેહજાતં મમ હૃદયગતં રામમીષત્સ્મિતાસ્યમ્ ॥ ૮૫॥

મધ્યાહ્ને રામચન્દ્રં મણિગણલલિતં મન્દહાસાવલોકં
 માર્તાણ્ડાનેકભાસં મરકતનિકરાકારમાનન્દમૂર્તિમ્ ।
સીતાવામાઙ્કસંસ્થં સરસિજનયનં પીતવાસો વસાનં
 વન્દેઽહં વાસુદેવં વરશરધનુષં માનસે મે વિભાન્તમ્ ॥ ૮૬॥

ધ્યાયેદ્રામં સુધાંશું નતસકલભવારણ્યતાપપ્રહારં
 શ્યામં શાન્તં સુરેન્દ્રં સુરમુનિવિનુતં કોટિસૂર્યપ્રકાશમ્ ।
સીતાસૌમિત્રિસેવ્યં સુરનરસુગમં દિવ્યસિંહાસનસ્થં
 સાયાહ્ને રામચન્દ્રં સ્મિતરુચિરમુખં સર્વદા મે પ્રસન્નમ્ ॥ ૮૭॥

કેયૂરાઙ્ગદકઙ્કણૈર્મણિગણૈર્વૈ રોચમાનં સદા
 રાકાપર્વણિ ચન્દ્રકોટિસદૃશં છત્રેણ વૈ રાજિતમ્ ।
હેમસ્તમ્ભસહસ્રષોડશયુતે મધ્યે મહામણ્ડપે
 દેવેશં ભરતાદિભિઃ પરિવૃતં રામં ભજે શ્યામલમ્ ॥ ૮૮॥

વિહાય કોદણ્ડમિમં મુહૂર્તં ગૃહાણ પાણૌ મણિચારુવેણુમ્ ।
માયૂરબર્હં ચ નિજોત્તમાઙ્ગે સીતાપતે રાઘવ રામચન્દ્ર ॥ ૮૯॥

શુદ્ધાન્તે માતૃમધ્યે દશરથપુરતઃ સઞ્ચરન્તં પરં તં
 કાઞ્ચીદામાનુવિદ્ધં પ્રતિમણિવિલસત્કિઙ્કિણીનિક્વણાઙ્ગમ્ ।
ફાલે મુક્તાલલામં પદયુગનિનદન્નૂપરં ચારુહાસં
 બાલં રામં ભજેઽહં પ્રણતજનમનઃખેદવિચ્છેદદક્ષમ્ ॥ ૯૦॥

સમ્પૂર્ણચન્દ્રવદનં સરસીરુહાક્ષં
 માણિક્યકુણ્ડલધરં મુકુટાભિરામમ્ ।
ચામ્પેયગૌરવસનં શરચાપહસ્તં
 શ્રીરામચન્દ્રમનિશં મનસા સ્મરામિ ॥ ૯૦॥

ઇન્દ્રનીલમણિસન્નિભદેહં વન્દ્યમાનમસકૃન્મુનિવૃન્દૈઃ ।
લમ્બમાનતુલસીવનમાલં ચિન્તયામિ સતતં રઘુવીરમ્ ॥ ૯૨॥

રામચન્દ્ર દયાસાન્દ્ર રઘુવીર નૃપોત્તમ ।
લોચનાભ્યાં કૃપાપૂરપૂર્ણાભ્યાં માં વિલોકય ॥ ૯૩॥

સમેતિ વર્ણદ્વયમાદરેણ સદા સ્મરન્ મુક્તિમુપૈતિ જન્તુઃ ।
કલૌ યુગે કલ્મષમાનસાનામન્યત્ર ધર્મે ખલુ નાધિકારહ્ ॥ ૯૪॥

ભક્તપ્રિયં ભક્તસમાધિગમ્યં ચિન્તાહરં ચિન્તિતકામધેનુમ્ ।
સૂર્યેન્દુકોટિદ્યુતિભાસ્વરં તં રામં ભજે રાઘવરામચન્દ્રમ્ ॥ ૯૫॥

સકલભુવનરત્નં સર્વશાસ્ત્રાર્થરત્નં
    સમરવિજયરત્નં સચ્ચિદાનન્દરત્નમ્ ।
દશમુખહરરત્નં દાનવારાતિરત્નં
    રઘુકુલનૃપરત્નં પાતુ માં રામરત્નમ્ ॥ ૯૬॥

માતુઃ પાર્શ્વે ચરન્તં મણિમયશયને મઞ્જુભૂષાઞ્ચિતાઙ્ગં
    મન્દં મન્દં પિબન્તં મુકુલિતનયનં સ્તન્યમન્યસ્તનાગ્રમ્ ।
અઙ્ગુલ્યગ્રૈઃ સ્પૃશન્તં સુખપરવશયા સુસ્મિતાલિઙ્ગિતાઙ્ગં
    ગાઢં ગાઢં જનન્યા કલયતુ હૃદયં મામકં રામબાલમ્ ॥ ૯૭॥

રામાભિરામં નયનાભિરામં વાચાભિરામં વદનાભિરામમ્ ।
સર્વાભિરામં ચ સદાભિરામં વન્દે સદા દાશરથિં ચ રામમ્ ॥ ૯૮॥

જય જય રઘુરામ શ્રીમુખામ્ભોજભાનો
    જય જય રઘુવીર શ્રીમદમ્ભોજનેત્ર ।
જય જય રઘુનાથ શ્રીકરાભ્યર્ચિતાઙ્ઘ્રે
    જય જય રઘુવર્ય શ્રીશ કારુણ્યસિન્ધો ॥ ૯૯॥

જય જય વરશઙ્ખશ્રીગદાચક્રધારિન્
    જય જય નિજદાસપ્રાપ્યદુર્લભ્યકામ ।
ત્રિભુવનમય સર્વપ્રાણિભાવજ્ઞ વિષ્ણો
    શરણમુપગતોઽહં સર્વદા ત્વાં શરણ્યમ્ ॥ ૧૦૦॥

ઇક્ષ્વાકુનન્દનં સુગ્રીવપૂજિતં
ત્રૈલો ક્યરક્ષકં સત્યસન્ધં સદા ।
રાઘવં રઘુપતિં રાજીવલોચનં
રામચન્દ્રં ભજે રાઘવેન્દ્રં ભજે ॥

વેદવેદ્યે પરે પુંસિ જાતે દશરથાત્મજે ।
વેદઃ પ્રાચેતસાદાસીત્ સાક્ષાદ્રામાયણાત્મના ॥ ૧૦૧॥

શ્રીરામેત્યેકદા વક્તું મનો યસ્ય પ્રવર્તતે ।
વૈકુણ્ઠવાસિનસ્તસ્ય કુલમેકોત્તરં શતમ્ ॥ ૧૦૨॥

રાશબ્દોચ્ચારમાત્રેણ મુખાન્નિર્યાન્તિ પાતકાઃ ।

પુનઃ પ્રવેશભીત્યા ચ મકારસ્તુ કપાટવત્ ॥ ૧૦૩॥

શ્રીરામાયણમાદિકાવ્યમૃષિણા વાલ્મીકિના નિર્મિતં
વેદાન્તાર્થવિશારદૈરનુદિનં સ્તુત્યં સુરૈરર્ચિતમ્ ।
શ્રેતૃણામઘનાશનં સુરતરોસ્તુલ્યં તુ મુક્તિપ્રદં
યે શ઼ૃણ્વન્તિ પઠન્તિ રામચરિતં તે યાન્તિ વિષ્ણોઃ પદમ્ ॥ ૧૦૪॥

## દ્વિતીયાશ્વાસઃ

શ્રીરામં જનકક્ષિતીશ્વરસુતાવક્ત્રામ્બુજાહારિણં
શ્રીમદ્ભાનુકુલાબ્ધિકૌસ્તુભમણિં શ્રીરત્નવક્ષઃસ્થલમ્ ।
શ્રીકણ્ઠાદ્યમરૌઘરત્ન મુકુટાલઙ્કારપાદામ્બુજં
શ્રીવત્સોજ્જ્વલમિન્દ્રનીલસદૃશં શ્રીરામચન્દ્રં ભજે ॥ ૧॥

શ્રીરઙ્ગેશપદાબ્જલગ્નહૃદયં શ્રીશઙ્ખચક્રાન્વિતં
શ્રીમન્નિર્જરપાદપસ્ફુટપદં શ્રીસિંહપીઠસ્થિતમ્ ।
શ્રીવૈકુણ્ઠસહસ્રમસ્તકલસદ્ભોગાસને શાયિનં
શ્રીભૂમીસુતયા યુતં શ્રિતનિધિં શ્રીરામમૂર્તિં ભજે ॥ ૨॥

આનન્દકન્દમરુણાધરમમ્બુજાક્ષં
આપીતવસ્ત્રમતસીકુસુમોજ્જ્વલાઙ્ગમ્ ।
અક્ષાન્તવર્ણમકલઙ્કમમેયમાદ્યં
સીતાપતિં રઘુપતિં શરણાગતોઽસ્મિ ॥ ૩॥

સાકેતે નવરત્નપઙ્ક્તિખચિતે ચિત્રધ્વજાલઙ્કૃતે
વામે સ્વર્ણમયે દલાષ્ટલલિતે પદ્મે વિમાનોત્તમે ।
આસીનં ભરતાદિસોદરજનૈઃ શાખામૃગૈઃ કિન્નરૈઃ
દિક્પાલૈર્મુનિપુઙ્ગવૈર્નૃપગણૈઃ સંસેવ્યમાનં ભજે ॥

વરાભયં દિવ્યરથાઙ્ગશઙ્ખં સકૌસ્તુભં વેષ્ટિતપીતવસ્ત્રમ્ ।
કિરીટહારાઙ્ગદકુણ્ડલાઙ્ગં શ્રીવત્સચિહ્નં શિરસા નમામિ ॥ ૬॥

દિગમ્બરં કિઙ્કિણિમેખલોજ્જ્વલં લલાટપર્યન્તવિલમ્બિતાલકમ્ ।
કલદ્વયસ્કં કમનીયનૂપુરં તં બાલરામં શિરસા નમામિ ॥ ૭॥

મન્દારમૂલે મણિપીઠસંસ્થં સુધાપ્લુતં દિવ્યવિરાટ્સ્વરૂપમ્ ।
સબિન્દુનાદાન્તકલાન્તતુર્યમૂર્તિં ભજેઽહં રઘુવંશરત્નમ્ ॥ ૮॥

અનર્ઘ્યમાણિક્યવિરાજમાનશ્રીપાદુકાલઙ્કૃતશોભનાભ્યામ્ ।
અશેષવૃન્દારકવન્દિતાભ્યાં નમો નમો રામપદામ્બુજાભ્યામ્ ॥ ૯॥

ધ્વજામ્બુજચ્છત્રરથાઙ્ગશઙ્ખ દમ્ભોલિપાશાઙ્કુશમત્સ્યચિહ્નમ્ ।
બ્રહ્મેન્દ્રદેવાદિકિરીટકોટિસઙ્ઘર્ષિપાદામ્બુજયુગ્મમીડે ॥ ૧૦॥

લલાટદેશોજ્જ્વલબાલભૂષણં સતાણ્ડવં વ્યાઘ્રનખાઙ્કુકન્ધરમ્ ।
દિગમ્બરં શોભિતબર્બરાલકં શ્રીબાલરામં શિરસા નમામિ ॥ ૧૧॥

શતાષ્ટદિવ્યસ્થલમૂર્તિવન્દિતં
    શતક્રતુબ્રહ્મમરુદ્ગણાર્ચિતમ્ ।
શશાઙ્કુવૈશ્વાનરભાનુમણ્ડલ-
    સ્થિતં ભજેઽહં રઘુવંશવર્ધનમ્ ॥ ૧૨॥

કર્ણાન્તવિશ્રાન્તધનુર્ગુણાઙ્કં કલમ્બલક્ષીકૃતરાક્ષસેશ્વરમ્ ।
વૃદ્ધશ્રવઃ સ્યન્દનમધ્યસંસ્થં રૂક્ષેક્ષણં રામમહં નમામિ ॥

સુત્રામ નીલોત્પલ નીલમેઘશ્રીનિર્જિતાઙ્ગં સુતયા ધરણ્યાઃ ।
યુક્તં સુરેન્દ્રાવનમાનસં તં રામં ભજે રાક્ષસવંશનાશમ્ ॥

રાકાચન્દ્રનિભાનનં રતિપતિદ્વેષિપ્રિયં રાક્ષસા-
    ધીશગ્રીવવિભેદનસ્ફુટપટુપ્રખ્યાતબાણોજ્જ્વલમ્ ।
રત્નાલઙ્કૃતપાદુકાઞ્ચિતપદામ્ભોજં રમાવલ્લભં
    રાગદ્વેષવિહીનચિત્તસુલભં રામં ભજે તારકમ્ ॥ ૧૫॥

આલોલસ્ફુટરત્નકુણ્ડલધરં ચાવિસ્મિતાલઙ્કૃતં
આધારાદિકચક્રમણ્ડલગતં ચાવિસ્મિતાલઙ્કૃતમ્ ।
આવિર્ભૂતકૃપાતરઙ્ગજલધિં ચાક્ષાન્તવર્ણાશ્રયં
આપન્નાર્તિનિદાઘમેઘસમભં રામં ભજે તારકમ્ ॥

સાકેતાન્તરતારમણ્ડપમહામાણિક્યસિંહાસને
    તન્મધ્યેઽષ્ટદલામ્બુજે સ્ફુટતરે ચિત્કર્ણિકે સંસ્થિતમ્ ।
સૌમિત્ર્યમ્બુજમિત્રસૂનુભરતશ્રીવાયુપુત્રૈર્વૃતં
    મુદ્રાલઙ્કૃતાપાણિસારસમજં રામં ભજે તારકમ્ ॥ ૧૭॥

વિરાજમાનોજ્જ્વલપીતવાસં
    વિશાલવક્ષઃસ્થલકૌસ્તુભશ્રિયમ્ ।

ભજે કિરીટાઙ્ગદરત્નકુણ્ડલં
    નમસ્તુલસ્યાઽમલમાલયાઽઙ્કિતમ્ ॥ ૧૮॥

મૂલાદિષટ્સરસિજાન્ત સહસ્રપદ્મ-
    પત્રાન્તરાલિનિલયં ભવબન્ધનાશમ્ ।
નાદાન્તચન્દ્રગલિતામૃતસિક્તરૂપં
    નાદાન્તનાદમહિમાસ્પદરામમીડે ॥ ૧૯॥

વન્દે વરપ્રદમહાવરદાનગર્વલઙ્કાધિનાથકુલપર્વતનાશવજ્રમ્ ।
તં રાવણાનુજમરુત્સુતભાનુસૂનુદિક્પાલસોદરગણૈઃ પરિસેવ્યમાનમ્ ॥ ૨૦॥

અજ્ઞાનગાઢતિમિરાપહભાનુમુર્તિં
    આરક્તચારુનયનામ્બુજમાદિબીજમ્ ।
અમ્ભોધિમધ્યવટપત્રશયાનમાદિ-
    મધ્યાન્તશૂન્યમખિલાસ્પદરામચન્દ્રમ્ ॥ ૨૧॥

સુધાસમુદ્રાન્તવિરાજમાનદ્વીપે સિતે ચન્દનપારિજાતે ।
મહાસને પન્નગતલ્પમધ્યે નિષણ્ણમીડે રઘુવંશરત્નમ્ ॥ ૨૨॥

સ્મિતાનનં પદ્મદલાયતેક્ષણં વિનીલમાણિક્યજિતાઙ્ગશોભિતમ્ ।
જટાકિરીટં શરચાપલાઞ્છનં નમામ્યહં ભાનુકુલાબ્ધિકૌસ્તુભમ્ ॥ ૨૩॥

પ્રસૂનબાણાઙ્કિતમિક્ષુચાપં ચક્રાબ્જપાશાઙ્કુશવંશનાલમ્ ।
ધરં કરૈરષ્ટભિરર્કવર્ણં શ્રીકૃષ્ણરૂપં પ્રણમામિ રામમ્ ॥ ૨૪॥

બાહૂરુપાદોદરવક્ત્રલોચનં દીપ્તપ્રચણ્ડાનલદુર્નિરીક્ષ્યમ્ ।
અશેષવૃન્દારકનાગગોચરં ભજામિ તે રાઘવ વિશ્વરૂપમ્ ॥ ૨૫॥

સહસ્રનેત્રાનનપાદબાહુમનન્તવીર્યં રવિકોટિતુલ્યમ્ ।
સ્રક્ચન્દનાલઙ્કૃતદિવ્યદેહં ભજામ્યહં તે હરિવિશ્વરૂપમ્ ॥ ૨૬॥

કદમ્બકોદણ્ડગદાબ્જસંયુતં દંષ્ટ્રાકરાલાઙ્કુધનઞ્જયાનનમ્ ।
પીતાંશુકં સ્વર્ણકિરીટકુણ્ડલં ભજામિ તે રાઘવ વિશ્વરૂપમ્ ॥ ૨૭॥

કોદણ્ડમિક્ષુજનિતસ્મરપઞ્ચબાણં
શઙ્ખં રથાવયવમઙ્કુશપાશવેણુમ્ ।
હસ્તાષ્ટકે નવમણિદ્યુતિમુદ્વહન્તં
પ્રદ્યુમ્નકૃષ્ણમનિશં ભજ રામચન્દ્રમ્ ॥

સીતાલોકનતત્પરં મણિનિધિં વ્યાખ્યાનમુદ્રાઞ્ચિતં
વામે જાનુનિ લમ્બહસ્તમનિશં વીરાસને સંસ્થિતમ્ ।
મૂલે કલ્પતરોરનાદિમુનિભિર્બ્રહ્માદિભિઃ સેવિતં
મુક્તાહારકિરીટકુણ્ડલધરં મૂર્ધાભિષિક્તં ભજે ॥

યદ્રૂપમાનન્દકરં મુનીનાં યદ્બાણમાખણ્ડલશત્રુનાશનમ્ ।
યદ્દૈવતં સર્વજનાન્તરસ્થં તત્સર્વરૂપં રઘુનાથમીડે ॥

નાદં નાદવિલીનચિત્તપવનં નાદાન્તતત્ત્વપ્રિયં
નામાકારવિવર્જિતં નવઘનશ્યામાઙ્ગનાદપ્રિયમ્ ।
નાદામ્ભોજમરન્દમત્તવિલસદ્ભૃઙ્ગં નદાન્તસ્થિતં
નાદાન્તધ્રુવમણ્ડલાબ્જરુચિરં રામં ભજે તારકમ્ ॥ ૩૧॥

નાનાભૂતહૃદબ્જપદ્મનિલયં નામોજ્જ્વલાભૂષણં
નામસ્તોત્રપવિત્રિતત્રિભુવનં નારાયણાષ્ટાક્ષરમ્ ।
નાદાન્તેન્દુગલત્સુધાપ્લુતતનું નાનાત્મચિન્માત્રકં
નાનાકોટિયુગાન્તભાનુસદૃશં રામં ભજે તારકમ્ ॥ ૩૨॥

ખશ્યામં ખગવાહનં ખગરિપું ખાદ્યાદિભૂતાત્મકં
ખાતીતં ખગમં ખતત્પરપદં ખદ્યોતકોટ્યુજ્જ્વલમ્ ।
ખાવાચ્યં ખગકેતનં ખગમનં ખર્વાટશ‌ૃઙ્ગાલયં
ખારાર્યં ચ ખરન્ધ્રપીઠનિલયં રામં ભજે તારકમ્ ॥ ૩૩॥

વેદ્યં વેદગુરું વિરિઞ્ચિજનકં વેદાન્તમૂર્તિસ્ફુરદ્
વેદં વેદકલાપમૂલમહિમાધારાન્તકન્દાઙ્કુરમ્ ।
વેદીશ‌ૃઙ્ગસમાનશેષશયનં વેદાન્તવેદાત્મિકં
વેદારાધિતપાદપઙ્કજમહં રામં ભજે તારકમ્ ॥ ૩૪॥

મૂલાધારધનઞ્જયસ્ફુટપટુજ્વાલાસમાલિઙ્ગિતં
મૂર્ધન્યાન્તશશાઙ્કમણ્ડલગતં ક્ષીરાભિષેકપ્રિયમ્ ।
મુક્તાશોભિતમૌલિભિર્મુનિવરૈરારાધિતં ભાવયે
પ્રખ્યાતૈસ્તિરગુણૈર્જનાધિપગણૈઃ શાખામૃગૈઃ સેવિતમ્ ॥ ૩૫॥

તારાકારવિમાનમધ્યનિલયં તત્ત્વત્રયારાધિતં
તત્ત્વાધીશ્વરયોગનિર્ગુણમહાસિદ્ધૈઃ સમારાધિતમ્ ।
તત્સઙ્ગં તરુણેન્દુશેખરસખં તારાત્રયાન્તર્ગતં
તપ્તસ્વર્ણકિરીટકુણ્ડલયુગં રામં ભજે તારકમ્ ॥ ૩૬॥

તારં તારકમણ્ડલોપરિલસજ્જ્યોતિઃ સ્ફુરત્તારકા-
તીતં તત્ત્વમસીતિવાક્યમહિમાધારં તડિત્સન્નિભમ્ ।
તત્ત્વજ્ઞાનપવિત્રિતત્રિભુવનં તારાસનાન્તર્ગતં
તારાન્તધ્રુવમણ્ડલાબ્જરુચિરં રામં ભજે તારકમ્ ॥ ૩૭॥

કસ્તૂરીઘનસારકુઙ્કુમલસચ્છ્રીચન્દનાલઙ્કૃતં
કન્દર્પાધિકસુન્દરં ઘનનિભં કાકુત્સ્થવંશધ્વજમ્ ।
કલ્યાણામ્બરવેષ્ટિતં કમલયા યુક્તં કલાવલ્લભં
કલ્યાણાચલકાર્મુકપ્રિયસખં કલ્યાણરામં ભજે ॥ ૩૮॥

મજ્જીવં મદનુગ્રહં મદધિપં મદ્ભાવનં મત્સખં
મત્તાતં મમ સદ્ગુરું મોહાન્ધવિચ્છેદનમ્ ।
મત્પુણ્યં મદનેકબાન્ધવજનં મજ્જીવનં મન્નિધિં
મત્સિદ્ધિં મમ સર્વકર્મસુકૃતં રામં ભજે તારકમ્ ॥ ૩૯॥

નિત્યં નીરજલોચનં નિરુપમં નીવારશૂકોપમં
નિર્ભેદાનુભવં નિરન્તરગુણં નીલાઙ્ગરાગોજ્જ્વલમ્ ।
નિષ્પાપં નિગમાગમાર્ચિતપદં નિત્યાત્મકં નિર્મલં
નિષ્પુણ્યં નિખિલં નિરઞ્જનપદં રામં ભજે તારકમ્ ॥ ૪૦॥

ધ્યાયે ત્વાં હૃદયામ્બુજે રઘુપતિં વિજ્ઞાનદીપાઙ્કુરં
હંસોહંસપરમ્પરાદિમહિમાધારં જગન્મોહનમ્ ।
હસ્તામ્ભોજગદાબ્જચક્રમતુલં પીતામ્બરં કૌસ્તુભં
શ્રીવત્સં પુરુષોત્તમં મણિનિભં રામં ભજે તારકમ્ ॥ ૪૧॥

સત્યં જ્ઞાનમનન્તમચ્યુતમજં ચાવ્યાકૃતં તત્પરં
કૂટસ્થાદિસમસ્તસાક્ષિમનઘં સાક્ષાદ્વિરાટ્તત્ત્વદમ્ ।
વેદ્યં વિશ્વમયસ્વલીનભુવનસ્વારાજ્યસૌખ્યપ્રદં
પૂર્ણં પૂર્ણતરં પુરાણપુરુષં રામં ભજે તારકમ્ ॥ ૪૨॥

રામં રાક્ષસવંશનાશનકરં રાકેન્દુબિમ્બાનનં
રક્ષોઽરિં રઘુવંશવર્ધનકરં રક્તાધરં રાઘવમ્ ।
રાધાધા(યોગીન્દ્રા)ત્મનિવાસિનં રવિનિભં રમ્યં રમાનાયકં
રન્ધ્રાન્તર્ગતશેષશાયિનમહં રામં ભજે તારકમ્ ॥ ૪૩॥

તારાકારં નિખિલનિલયં તત્ત્વમસ્યાદિલક્ષ્યં

શબ્દાવાચ્યં ત્રિગુણરહિતં વ્યોમમઙ્ગુષ્ઠમાત્રમ્ ।
નિર્વાણાખ્યં સુગુણમગુણં વ્યોમરન્ધ્રાન્તરસ્થં
સૌષુમ્નાન્તઃ પ્રણવસહિતં રામચન્દ્રં ભજેઽહમ્ ॥ ૪૪॥

મુક્તેર્મૂલં મુનિવરહૃદાનન્દકન્દં મુકુન્દં
કૂટસ્થાખ્યં સકલવરદં સર્વચૈતન્યરૂપમ્ ।
નાદાતીતં કમલનિલયં નાદનાદાન્તતત્ત્વં
નાદાતીતં પ્રકૃતિરહિતં રામચન્દ્રં ભજેઽહમ્ ॥ ૪૫॥

નિજાનન્દાકારં નિગમતુરગારાધિતપદં
પરબ્રહ્માનન્દં પરમપદયુગં પાપહરણમ્ ।
કૃપાપારાવારં પરમપુરુષં પદ્મનિલયં
ભજે રામં શ્યામં પ્રકૃતિરહિતં નિર્ગુણમહમ્ ॥ ૪૬॥

શ્રીમદ્વૈકુણ્ઠનાથં સુરમુનિમુકુટજ્યોતિષં સ્વર્ણપીઠં
નીલાઙ્ગં ચન્દ્રવક્ત્રં મણિમયમુકુટં બાણકોદણ્ડહસ્તમ્ ।
પદ્માક્ષં પાપનાશં પ્રણવમયમહારત્નસિંહાસનસ્થં
શ્રીસીતાવામભાગં શ્રિતજનવરદં રામચન્દ્રં ભજેઽહમ્ ॥ ૪૭॥

સાકેતે મણિમણ્ડપે સુરતરુપ્રાન્તે વિમાનાન્તરે
પદ્મે ચાષ્ટદલોજ્જ્વલે નુતમહાસૌધે સુધાપા(મા)ન્વિતે ।
સખ્યે સૂર્યજરાવણાનુજમરુત્પુત્રાનુજૈઃ સેવિતં
મધ્યે વાસવનીલકોમલનિભં રામં ભજે તારકમ્ ॥ ૪૮॥

હૃદયકુહરમધ્યે દ્યોતિતં મન્ત્રસારં
નિગમમ(નિ)યમગમ્યં વેદશાસ્ત્રૈરચિન્ત્યમ્ ।
હરિહરવિધિવન્દ્યં હંસમન્ત્રાન્તરસ્થં
દશરથસુતમીડે દૈવતં દેવતાનામ્ ॥

દેવેન્દ્રનીલનવમેઘવિનિર્જિતાઙ્ગં
પૂર્ણેન્દુબિમ્બવદનં શરચાપહસ્તમ્ ।
સીતાસમેતમનિશં શરણં શરણ્યં
ચેતો મદીયમભિવાઞ્છતિ રામચન્દ્રમ્ ॥ ૫૦॥

ઓતપ્રોતસમસ્તવસ્તુનિચયં ચૌઙ્કારબીજાક્ષરં
ઓઙ્કારપ્રકૃતિં ષડક્ષરહિતં ચૌઙ્કારકન્દાઙ્કુરમ્ ।
ઓઙ્કારસ્ફુટભૂર્ભુવઃ સુવ(પ)રિધિં ચૌઘત્રયારાધિતં

ઓઙ્કારોજ્જ્વલસિંહપીઠનિલયં રામં ભજે તારકમ્ ॥ ૫૧॥

સાકેતે ધવલે સુરદ્રુમત્તલે સૌધે વિમાનાન્તરે
આદિક્ષાન્તસમસ્તવર્ણકમલે દિવ્યે મૃગેન્દ્રાસને ।
ઓઙ્કારોજ્જ્વલકર્ણિકે સુરસરિન્મધ્યે સદેવાન્તરે
વ્યસ્તં વ્યાસમુનીશ્વારાદ્યભિનુતં રામં ભજે તારકમ્ ॥ ૫૨॥

કોદણ્ડદીક્ષાગુરુમાદિમૂલં
ગુણાશ્રયં ચન્દનકુઙ્કુમાઙ્કમ્ ।
સલક્ષ્મણં સર્વજનાન્તરસ્થં
પરાત્પરં રામમહં નમામિ ॥ ૫૩॥

મૂલાધારસરોરુહે હુતવહસ્થાને ત્રિકોણાન્તરે
કન્દે કુણ્ડલિકાસુષુપ્તિપટલીવાસાન્તવર્ણાશ્રયે ।
બાલાર્કપ્રતિમં સુ(વ)રાભયકરં પાશાઙ્કુશાલઙ્કૃતં
ભૂતત્ત્વાશ્રયમાદિપૂરુષમજં રામં ભજે તારકમ્ ॥ ૫૪॥

સ્વાધિષ્ઠાનસરોરુહે પ્રવિલસદ્બાલાન્તવર્ણાશ્રયં
બ્રહ્મગ્રન્થિમહોન્નતે કરતલે શ્રીકુણ્ડિકામાલિકામ્ ।
પીઠે રત્નનિભં વરાભયકરં વાણીયુતં બિભ્રતં
સર્વં સર્વગમિન્દિરાસહચરં રામં ભજે તારકમ્ ॥ ૫૫॥

ડાફાન્ત્યાક્ષરપઙ્કજે દશદલે માણિક્યસમ્પૂરિતે
વિષ્ણુગ્રન્થિમયે વરાભયકરં ચાશઙ્ખચક્રાન્વિતમ્ ।
માર્તાણ્ડદ્યુતિ મઞ્જુનાભમતુલં પીતામ્બરં કૌસ્તુભં
સર્વં સર્વગમિન્દિરાસહચરં રામં ભજે તારકમ્ ॥ ૫૬॥

હૃત્પદ્મે વિલયાર્કકોટિસદૃશં કણ્ઠાન્તવર્ણોજ્જ્વલે
પ્રાણાન્તપ્રણવાન્તરે ચ વિલસદ્બોધાર્ણપીઠાન્તરે ।
સૂર્યે હંસમયે સદાશિવપદં કોદણ્ડદીક્ષાગુરુ
વાસામોક્ષ રમાસમેતમનિશં રામં ભજે તારકમ્ ॥ ૫૭॥

સાક્ષાત્ષોડશ દિવ્યપત્રકમલે જીવાત્મસંસ્થાપિતે
રુદ્રગ્રન્થિમયે મનોન્મનિપથે જાલન્ધ્રપીઠાન્તરે ।
શુભ્રજ્યોતિમયં શરીરસહિતં સંસ્થં સુધાશીતલં
શબ્દબ્રહ્મનિવાસભૂતવદનં રામં ભજે તારકમ્ ॥ ૫૮॥

ભ્રૂમધ્યે નિગમાગમોજ્જ્વલપદે ચન્દ્રે ત્રિમાર્ગાન્તરે
    નિર્દ્વન્દ્વે નિખિલાર્થતત્ત્વવિલસત્સૂક્ષ્મે સુષુમ્નોન્મુખે ।
આસીનં પ્રલયાર્કભાસુરપદં જ્યોતિઃ સ્વરૂપાત્મકં
    કર્ણાનાઞ્ચિતમોક્ષલક્ષ્મિસહિતં રામં ભજે તારકમ્ ॥ ૫૯॥

શીર્ષામ્ભોરુહકર્ણિકે નિરુપમે શ્રીષોડશાન્તે શશિ-
પ્રખ્યાતામૃતવાર્ધિવીચિલહરીનિર્વાણપીઠાન્તરે ।
શબ્દબ્રહ્મપરં ચરાચરગુરું તેજઃ પરં શાશ્વતં
સત્યાસત્યમગોચરં હૃદિ સદા સીતાસમેતં ભજે ॥

સાકેતે રવિકોટિસન્નિભમહાહર્મ્યે સુસિંહાસને
    નાનારત્નવિનિર્મિતે મુનિજનાકીર્ણે સદાનન્દને ।
દેવાધીશ્વરપઙ્કજે નિવાસિતં વામાઙ્કસીતોજ્જ્વલં
    દેવેન્દ્રોપલનીલકોમલનિભં રામં ભજે તારકમ્ ॥ ૬૦॥

સાકેતે નગરે સમસ્તસુખદે હર્મ્યેન્દુકોટિદ્યુતે
    નક્ષત્રગ્રહપઙ્ક્તિલગ્નશિખરે ચાન્તર્યપઙ્કેરુહે ।
વાલ્મીકાત્રિપરાશરાદિમુનિભિઃ સંસેવ્યમાનં સ્થિતં
    સીતાલઙ્કૃતવામભાગમનિશં રામં ભજે તારકમ્ ॥ ૬૧॥

વન્દે રામમનાદિપૂરુષમજં વન્દે રમાનાયકમ્ ।
    વન્દે હારકિરીટકુણ્ડલધરં દેવેન્દ્રનીલદ્યુતિમ્ ।
વન્દે ચાપકદમ્બકોજ્જ્વલકરં વન્દે જગન્મઙ્ગલં
    વન્દે પઙ્ક્તિરથાત્મજં મમ ગુરું વન્દે સદા રાઘવમ્ ॥ ૬૨॥

વન્દે શૌનકગૌતમાદ્યભિનુતં વન્દે ઘનશ્યામલં
    વન્દે તારકપીઠમધ્યનિલયં વન્દે જગન્નાયકમ્ ।
વન્દે ભક્તજનૌઘદેવવિટપં વન્દે ધનુર્વલ્લભં
    વન્દે તત્ત્વમસીતિ વાક્યજનકં વન્દે સદા રાઘવમ્ ॥ ૬૩॥

વન્દે સૂર્યશશાઙ્કલોચનયુગં વન્દે જગત્પાવનં
    વન્દે પત્રસહસ્રપદ્મનિલયં વન્દે પુરારિપ્રિયમ્ ।
વન્દે રાક્ષસવંશનાશનકરં વન્દે સુધાશીતલં
    વન્દે દેવકપીન્દ્રકોટિવિનુતં વન્દે સદા રાઘવમ્ ॥ ૬૪॥

વન્દે સાદરગર્વભઙ્ગવિશિખં વન્દે જગજ્જીવનં
    વન્દે કૌશિકયાગરક્ષણકરં વન્દે ગુરુણાં ગુરુમ્ ।

વન્દે બાણશરાસનોજ્જ્વલકરં વન્દે જટાવલ્કલં
    વન્દે લક્ષ્મણભૂમિજાન્વિતકરં વન્દે સદા રાઘવમ્ ॥ ૬૫॥

વન્દે પાણ્ડુરપુણ્ડરીકનયનં પૂર્ણેન્દુબિમ્બાનનં
    વન્દે કમ્બુગલં કરભ્જયુગલં વન્દે લલામોજ્જ્વલમ્ ।
વન્દે પીતદુકૂલમમ્બુદનિભં વન્દે જગન્મોહનં
    વન્દે કારણમાનુષોજ્જ્વલતનું વન્દે સદા રાઘવમ્ ॥ ૬૬॥

વન્દે નીલસરોજકોમલરુચિં વન્દે જગદ્વન્દિતં
    વન્દે સૂર્યકુલાબ્ધિકૌસ્તુભમણિં વન્દે સુરારાધિતમ્ ।
વન્દે પાતકપઞ્ચકપ્રહરણં વન્દે જગત્કારણમ્
    વન્દે વિંશતિપઞ્ચતત્ત્વરહિતં વન્દે સદા રાઘવમ્ ॥ ૬૭॥

વન્દે સાધકવર્ગકલ્પકતરું વન્દે ત્રિમૂર્ત્યાત્મકં
    વન્દે નાદલયાન્તકસ્થલગતં વન્દે ત્રિવર્ણાત્મકમ્ ।
વન્દે રાગવિહીનચિત્તસુલભં વન્દે સભાનાયકં
    વન્દે પૂર્ણદયામૃતાર્ણવમહં વન્દે સદા રાઘવમ્ ॥ ૬૮॥

વન્દે સાત્તિવકતત્ત્વમુદ્રિતતનું વન્દે સુધાદાયકં
    વન્દે ચારુચતુર્ભુજં મણિનિભં વન્દે ષડધ્વ(બ્જ)સ્થિતમ્ ।
વન્દે બ્રહ્મપિપીલિકાદિનિલયં વન્દે વિરાડ્વિગ્રહં
    વન્દે પન્નગતલ્પશાયિનમહં વન્દે સદા રાઘવમ્ ॥ ૬૯॥

અયોધ્યાપુરમણ્ડપે સ્ફુરિતસિંહપીઠે સ્થિતં
    વસિષ્ઠમુનિગૌતમૈર્ભૃગુશુકાદિસંસેવિતમ્ ।
દિનેશસુતરાવણાનુજસહોદરાદ્યાવૃતં
    ભજામિ રઘુનન્દનં પ્રણવબીજસારાત્મકમ્ ॥ ૭૦॥

વિલોલમણિમણ્ડલં વિમલચન્દ્રવિમ્બાનનં
    વિખણ્ડિતદશાનનં વિતતચાપબાણોજ્જ્વલમ્ ।
વિમોહિતજગત્ત્રયં વિકચપદ્મપત્રેક્ષણં
    વિભીષણસુરક્ષિતં વિજયરામમીડે હરિમ્ ॥ ૭૧॥

ચલત્કનકકુણ્ડલોલ્લસિતદિવ્યગણ્ડસ્થલં
    ચરાચરજગન્મયં ચરણપદ્મગઙ્ગાશ્રયમ્ ।
ચતુર્વિધફલપ્રદં ચરમપીઠ મધ્યસ્થિતં
    ચિદંશમખિલાસ્પદં દશરથાત્મજં ચિન્તયે ॥ ૭૨॥

સનન્દનમુનિપ્રિયં સકલવર્ણવેદાત્મકં
    સમસ્તનિગમાગમસ્ફુરિતતત્ત્વસિંહાસનમ્ ।
સહસ્રનયનાબ્જજાદ્યમરવૃન્દસંસેવિતં
    સમષ્ટિપુરવલ્લભં દશરથાત્મજં ચિન્તયે ॥ ૭૩॥

અનર્ઘ્યમણિપૂરકોલ્લસિતદિવ્યતેજઃ પરં
    અનાહતસરોરુહસ્ફુરિતહંસનાદાન્વિતમ્ ।
અનન્તદલપઙ્કજં સ્ફુટમૃગાઙ્કબિમ્બામૃતા-
    પ્લુતાઙ્ગમખિલાસ્પદં દશરથાત્મજં ચિન્તયે ॥ ૭૪॥

જાગ્રત્સ્વપ્નસુષુપ્તિકાલવિલસત્તત્ત્વાત્મચિન્માત્રકં
    ચૈતન્યાત્મકમાદિપાપરહિતં ભૂમ્યાદિ તન્માત્રકમ્ ।
શામ્ભવ્યાદિસમસ્તયોગકુલકં સઙ્ખ્યાદિતત્ત્વાત્પરં
    શબ્દાવાચ્યમહં નમામિ સતતં વ્યુત્પત્તિનાશાત્પરમ્ ॥ ૭૫॥

ધ્યાયે ત્વાં નવવિદ્રુમસ્ફુટતનું બર્હાલસન્મેચકં
    નાસારઞ્જિતમૌક્તિકં પરિલસત્પીતામ્બરં કૌસ્તુભમ્ ।
વેણૂકમ્બુરથાઙ્ગપાશપરિઘપ્રાસેક્ષુચાપાશુગં
    શ્રીરામં નવમન્મથાધિપમહં ષટ્કોણચક્રસ્થિતમ્ ॥ ૭૬॥

સાકેતે નગરે સમસ્તમહિમાધારે જગન્મોહનં
    રત્નસ્તમ્ભસહસ્રમણ્ડપમહાસિંહાસને સામ્બુજે ।
વિશ્વામિત્રવસિષ્ઠગૌતમશુકવ્યાસાદિભિર્મૌનિભિઃ
    ધ્યેયં લક્ષ્મણલોકપાલસહિતં સીતાસમેતં ભજે ॥ ૭૭॥

એકાન્તે કમલે જલે વિકસિતે ચન્દ્રીકૃતસ્થાપિતે
    સ્થાને તારકમણ્ડપે તનુબિલવ્યાપ્તે સુધામણ્ડપે ।
અબ્જાર્કાનિલમણ્ડલોપરિ મહાશ્રીષોડશાન્તે સદા
    નાદાન્તે જનકાત્મજાન્વિતમહં રામં ભજે તારકમ્ ॥ ૭૮॥

સાકેતે મણિમણ્ડપે સુરતરુપ્રાન્તેઽષ્ટવર્ણોલ્લસત્
    પત્રે તારકકર્ણિકે પ્રવિલસત્કલ્પપ્રસૂનાઞ્ચિતે ।
પદ્મે વેદચતુષ્કમણ્ડલસિતે નાદાન્તશય્યાતલે
    તં સેવે ધ્રુવમણ્ડલેન્દુવિગલત્પીયૂષધારાપ્લુ(મૃ)તમ્ ॥ ૭૯॥

ધ્યાયે ત્વાં રવિમણ્ડલેન્દુધવલે પદ્મે નિષણ્ણં હરિં

સ્વર્ણાભં કરશઙ્ખચક્રલલિતં પીતામ્બરં કૌસુત્ભમ્ ।
સ્વર્ણશ્મશ્રુનખાલકં લલનયા યુક્તં કિરીટાઙ્ગદં
હારાલઙ્કૃતવક્ષસં પદયુગં શ્રીપાદુકાલઙ્કૃતમ્ ॥ ૮૦॥

વસન્તાક્ષરાખ્યે ચતુઃ પત્રપદ્મે
ત્રિકોણાન્તકણ્ઠે ધરાતત્ત્વયુક્તે ।
વરાભીતિપાશાઙ્કુશં વિદ્રુમાભં
ગજાશ્ચે નિષણ્ણં ભજે રામચન્દ્રમ્ ॥ ૮૧॥

વલાન્તાક્ષરાભ્યાં ચ ષટ્પત્રપદ્મે
લસત્તોયતત્ત્વે વરાભીતિહસ્તે ।
મહાકુણ્ડિકાં ચાક્ષમાલાં વહન્તં
ચતુર્વક્ત્રરૂપં ભજે રામચન્દ્રમ્ ॥ ૮૨॥

ડફાન્તાક્ષરાભ્યાં મણિવ્રાતપૂરે
રથાઙ્ગાબ્જહસ્તં મહેન્દ્રોપલાઙ્ગમ્ ।
લસદ્વહ્નિત્ત્વં નિષણ્ણં ગદાઙ્કું
મહાવિષ્ણુરૂપં ભજે રામચન્દ્રમ્ ॥ ૮૩॥

કઠાન્તાક્ષરાખ્યે જગત્પ્રાણતત્ત્વે
વરાભીતિહસ્તં ત્રિશૂલં દધાનમ્ ।
ઉમાનાથમબ્જારિખણ્ડોજ્જ્વલાઙ્કું
સ્મરારિસ્વરૂપં ભજે રામચન્દ્રમ્ ॥ ૮૪॥

વિશુદ્ધાખ્યપદ્મે નભસ્તત્ત્વરમ્યે
અરૂપં નિરૂપં સમસ્તેષુવાસમ્ ।
વિશિષ્ટં મનોગમ્યમેકં ત્વનાદિં
ભજે જીવજીવાત્મરામં ચ રામમ્ ॥ ૮૫॥

દ્વિપત્રાબ્જમધ્યે મનસ્તત્ત્વગમ્યે
જગત્કારણં જ્યોતિરાનન્દરૂપમ્ ।
લસદ્ભાવવિષ્ણું મનોભાવદીપં
પરાત્મસ્વરૂપં ભજે રામચન્દ્રમ્ ॥ ૮૬॥

સદાનન્દદેવે સહસ્રારપદ્મે
ગલચ્ચન્દ્રપીયૂષધારાવૃતાન્તે ।
સ્થિતં રામમૂર્તિં નિષેવે નિષેવે-

ઽન્યદૈવં ન સેવે ન સેવે ન સેવે ॥ ૮૭॥

સુધાબ્જાસિતદ્વીપમધ્યે વિમાને
સુપર્વાણવૃક્ષોજ્જ્વલે શેષતલ્પે ।
નિષણ્ણં રમાઙ્કં નિષેવે નિષેવે-
ઽન્યદૈવં ન સેવે ન સેવે ન સેવે ॥ ૮૮॥

ચિદંશં સદાનન્દમાનન્દકન્દં
સુષુમ્નાખ્યરન્ધ્રાન્તરાલં ચ હંસમ્ ।
સચક્રં સશઙ્ખં સપીતામ્બરાઙ્કં
પરં ચાન્યદૈવં ન જાને ન જાને ॥ ૮૯॥

સુપર્વાણવૃક્ષોજ્જ્વલસ્વર્ણપીઠે
વનૌકાદિભિર્મૌનિભિઃ સેવ્યમાનમ્ ।
સ્થિતં પુષ્પવૃષ્ટ્યાઽઽવૃતં રામમૂર્તિં
સદા ભૂમિજાયુક્તમીડે હૃદન્તે ॥ ૯૦॥

કરે દિવ્યચક્રં પરે ચારુશઙ્ખં
ગલે તારહારં લલાટે લલામમ્ ।
ભુજઙ્ગે નિષણ્ણં પરાનન્દરૂપં
સદા ભૂમિજાયુક્તમીડે હૃદન્તે ॥ ૯૧॥

ચતુર્વેદકૂટોલ્લસત્કારણાખ્યે
સ્ફુરદ્દિવ્યવૈમાનિકે ભોગિતલ્પે ।
પરન્ધામમૂર્તિં નિષણ્ણં નિષેવે-
ઽન્યદૈવં ન સેવે ન સેવે ન સેવે ॥ ૯૨॥

લસદ્દિવ્યશેષાચલે યોગપીઠે
સદાનન્દવૈમાનિકે માસહાયમ્ ।
મુનીનાં હૃદાનન્દમોઙ્કારગમ્યં
સદા ભૂમિજાયુક્તમીડે હૃદન્તે ॥ ૯૩॥

મનઃસ્થં મનોઽન્તઃસ્થમાદ્યન્તરૂપં
મહાચિન્તવર્જં ચ મધ્યસ્થમીશમ્ ।
મનોબુદ્ધ્યહઙ્કારચિત્તાદિસાક્ષિં
પરસ્વપ્રકાશં ભજે રામચન્દ્રમ્ ॥ ૯૪॥

પરાનન્દવસ્તુસ્વરૂપાદિ સાક્ષિં
    પરબ્રહ્મગમ્યં પરં જ્યોતિમૂર્તિમ્ ।
પરાશક્તિમિત્રાપ્રિયારાધિતાઙ્ઘ્રિં
    પરન્ધામરૂપં ભજે રામચન્દ્રમ્ ॥ ૯૫॥

પરં પવિત્રં પરવાસુદેવં
    પરાત્પરં તં પરમેશ્વરાખ્યમ્ ।
ગુણત્રયારાધિતમૂલકન્દ-
    માદિત્યવર્ણં તમસઃ પરસ્તાત્ ॥ ૯૬॥

સાકેતે ગુરુગન્ધધૂપનિવિડે માણીક્યદીપાન્વિતે
    કસ્તૂરીઘનસારકુઙ્કુમરસપ્રાચુર્યસારોજ્જ્વલે ।
નાનાપુષ્પવિતાન પઙ્ક્તિરુચિરે સૌવર્ણસિંહાસને
    વાસં મન્મથમન્મથં મણિનિભં રામ ભજે તારકમ્ ॥ ૯૭॥

ભઙ્ગોત્તુઙ્ગમયામૃતાબ્ધિલહરીમધ્યે વિરાડ્વિગ્રહે
    દ્વીપે નિર્જરપાદપૈઃ પરિવૃતે કર્પૂરદીપોજ્જ્વલે ।
ઓઙ્કારાન્તરમન્દિરે મણિમયે શેષાન્તરાશાયિનં
    લક્ષ્મીયુક્તમસારચિત્સુખપદં રામં ભજે તારકમ્ ॥ ૯૮॥

વૈકુણ્ઠે નગરે સુરદ્રુમતલે સ્વાનન્દવપ્રાન્તરે
    નાનારત્નવિનિર્મિતાસ્ફુટપટુપ્રાકારસંવેષ્ટિતે ।
સૌધેન્દૂપલશેષતલ્પલલિતે નીલોત્પલાચ્છાદિતે
    પર્યઙ્કે શયિનં રમાદિસહિતં રામં ભજે તારકમ્ ॥ ૯૯॥

વૈકૂણ્ઠે પુટભેદને મણિમયપ્રાન્તેન્દુસિંહાસને
    અક્ષાન્તાન્તસરોરુહે શશિગલત્પીયૂષવાર્યન્તરે ।
ચન્દ્રાર્કાનલભાનુમણ્ડલયુતે શેષાહિતલ્પાન્તરે
    વાસં વાસવનીલકોમલનિભં રામં ભજે તારકમ્ ॥ ૧૦૦॥

ક્ષીરાબ્ધૌ શશિશઙ્ખમૌક્તિકલસદ્દ્વીપે સુધર્માન્તરે
    બિન્દૌ સાર્ધકલાન્વિતે પરિલસન્નાગાન્તરે સંસ્થિતમ્ ।
કોટીરાઙ્ગદહારકુણ્ડલમણિગ્રૈવેયહારોજ્જ્વલં
    શ્રીવત્સાઞ્ચિતમિન્દ્રનીલસદૃશં રામં ભજે તારકમ્ ॥ ૧૦૧॥

સાકેતેઽનલચન્દ્રભાનુવિલસત્તચ્ચક્રબિન્દુસ્થિતં
    બાલાર્કદ્યુતિભાસુરં કરતલે પાશાઙ્કુશૌ બિભ્રતમ્ ।

બાણં ચાપયુતં વિશાલનયનં સ્મેરાનનામ્ભોરુહં
    સ્ત્રીપુંરૂપધરં વિલાસસદનં રામં ભજે તારકમ્ ॥ ૧૦૨॥

અર્ધં રક્તવદર્ધનીલરુચિરં અર્ધેન્દુચૂડાર્ચિતં
    અર્ધં રત્નકીરીટકુણ્ડલધરં તાટઙ્કમર્ધં ધનુઃ ।
શઙ્ખં ચક્રગદાબ્જસંયુતકરં ધ્યેયં સદા વૈષ્ણવં
    પાશં ચાઙ્કુશબાણસન્ધૃતકરં રામં ભજે તારકમ્ ॥ ૧૦૩॥

સહસ્રપત્રામ્બુજકર્ણિકાન્તર્જ્યોતિઃ પ્રકાશં પરમાદિમૂલમ્ ।
તેજોમયં જન્મજરાવિહીનં શ્રીરાઘવં નિત્યમહન્નમામિ ॥ ૧૦૪॥

સકલભુવનરત્નં સચ્ચિદાનન્દરત્નં
    સકલહૃદયરત્નં સૂર્યબિમ્બાન્તરત્નમ્ ।
વિમલસુકૃતરત્નં વેદવેદાન્તરત્નં
    પુરહરજપરત્નં પાતુ માં રામરત્નમ્ ॥ ૧૦૫॥

ઇક્ષ્વાકુવંશાર્ણવજાતરત્નં સીતાઙ્ગનાયૌવનભાગ્યરત્નમ્ ।
વૈકુણ્ઠરત્નં જનભાગ્યરત્નં શ્રીરામરત્નં શિરસા નમામિ ॥ ૧૦૬॥

નિગમશિશિરરત્નં નિર્મલાનન્દરત્નં
    નિરુપમગુણરત્નં નાદનાદાન્તરત્નમ્ ।
દશરથકુલરત્નં દ્વાદશાન્તસ્થરત્નં
    પશુપતિજપરત્નં પાતુ માં રામરત્નમ્ ॥ ૧૦૭॥

શતમખનુતરત્નં ષોડશાન્તસ્થરત્નં
    મુનિજનજપરત્નં મુખ્યવૈકુણ્ઠરત્નમ્ ।
નિરુપમગુણરત્નં નીરજાન્તસ્થરત્નં
    પરમપદવિરત્નં પાતુ માં રામરત્નમ્ ॥ ૧૦૮॥

સકલસુકૃતરત્નં સત્યવાક્યાર્થરત્નં
    શમદમગુણરત્નં શાશ્વતાનન્દરત્નમ્ ।
પ્રણયનિલયરત્નં પ્રસ્ફુટજ્જ્યોતિરત્નં
    પરમપદવિરત્નં પાતુ માં રામરત્નમ્ ॥ ૧૦૯॥

નિખિલનિલયમન્ત્રં નિત્યતત્ત્વાખ્યમન્ત્રં
    ભુવકુલહરમન્ત્રં ભૂમિજાપ્રાણમન્ત્રમ્ ।
પવનજનુતમન્ત્રં પાર્વતીમોક્ષમન્ત્રં

પશુપતિ નિજમન્ત્રં પાતુ માં રામમન્ત્રમ્ ॥ ૧૧૦॥

પ્રણવનિલયમન્ત્રં પ્રાણનિર્યાણમન્ત્રં
પ્રકૃતિપુરુષમન્ત્રમ્બ્રહ્મરુદ્રેન્દ્રમન્ત્રમ્ ।
પ્રકટદુરિતરાગદ્વેષનિર્નાશમન્ત્રં
રઘુપતિનિજમન્ત્રં રામ રામેતિ મન્ત્રમ્ ॥ ૧૧૧॥

દક્ષરથસુતમન્ત્રં દૈત્યસંહારમન્ત્રં
વિવિધવિનુતમન્ત્રં વિશ્વવિખ્યાતમન્ત્રમ્ ।
મુનિગણનુતમન્ત્રં મુક્તમાર્ગૈકમન્ત્રં
રઘુપતિ નિજમન્ત્રં રામ રામેતિ મન્ત્રમ્ ॥ ૧૧૨॥

સંસારસાગરભયાપહવિશ્વમન્ત્રં
સાક્ષાન્મુમુક્ષુજનસેવિતસિદ્ધમન્ત્રમ્
સારઙ્ગહસ્તમુખહસ્તનિવાસમન્ત્રં
કૈવલ્યમન્ત્રમનિશં ભજ રામમન્ત્રમ્ ॥ ૧૧૩॥

જયતુ જયતુ મન્ત્રં જન્મસાફલ્યમન્ત્રં
જનનમરણભેદક્લેશવિચ્છેદમન્ત્રમ્ ।
સકલનિગમમન્ત્રં સર્વશાસ્ત્રૈકમન્ત્રં
રઘુપતિનિજમન્ત્રં રામ રામેતિ મન્ત્રમ્ ॥ ૧૧૪॥

અજ્ઞાનસમ્ભવભવામ્બુધિબાડવાગ્નિં
અવ્યક્તતત્ત્વનિકરપ્રણવાધિરૂઢમ્ ।
સીતાસમેતમનુજેન હૃદન્તરાલે
પ્રાણપ્રયાણસમયે મમ સન્નિધત્તામ્ ॥ ૧૧૫॥

## તૃતીયાશ્વાસઃ

શ્રીરામં શિવચાપભઙ્ગનિપુણં સીતાઙ્ગનાવલ્લભં
સુત્રામાર્ચિતપાદપદ્મયુગલં સૂર્યેન્દુનેત્રોજ્જ્વલમ્ ।
કર્પૂરાઙ્ગવિલેપનં ઘનરુચિં કારુણ્યપાથોનિધિં
વન્દે કલ્પતરુપ્રવેશિતલસત્સિંહાસનાધિષ્ઠિતમ્ ॥ ૧॥

શ્રીરામં શિતિકન્ધરસ્ય ધનુષઃ સમ્ભેદનાત્પ્રાપિતાં
સીતાં કાઞ્ચનસન્નિભાં પરિણતામાકલ્પરત્નોજ્જ્વલામ્ ।

વામાઙ્કોપરિ લજ્જયા નતમુખીમાલોક્ય દિવ્યાસને
    શ્રીમદ્ભાનુશશાઙ્કકોટિનિવહઃ પાયાત્સ વો રાઘવઃ ॥ ૨॥

શ્રીરામં ભુવનૈકસુન્દરતનું ધારાધરશ્યામલં
    રાજીવાયતલોચનં રઘુવરં રાકેન્દુબિમ્બાનનમ્ ।
કોદણ્ડાદિનિજાયુધાશ્રિતભુજૈર્ભાન્તં વિદેહાત્મજા-
    ધીશં ભક્તજનાવનં રઘુવરં શ્રીરામચન્દ્રં ભજે ॥ ૩॥

આરામં વૈભવાનામભિનવસુપથં હારકેયૂરકાન્તં
    હાસોલ્લાસાભિરામં મણિમયમુકુટં મઙ્ગલાનાં નિવાસમ્ ।
મન્દારામસીમાન્તરમણિભવનાધિષ્ઠિતં શિષ્ટસેવ્યં
    સલ્લાપાનન્દસિન્ધું પ્રણવમભિનિશં રામચન્દ્રં ભજેઽહમ્ ॥ ૪॥

રામં રાજશિખામણિં રઘુવરં રાકેન્દુબિમ્બાનનં
    રાજીવાયતલોચનં રણહતાનેકાસુરં રાઘવમ્ ।
સીતાચારુપયોધરાઞ્ચિતલસત્કાશ્મીરગન્ધાચિતં
    રાજત્કુણ્ડલમણ્ડિતં શુભકરં રામાભિરામં ભજે ॥ ૫॥

રામં કોમલનીલમેઘવિલસદ્ગાત્રં પયોજાનનં
    કાકુત્સ્થં દશકણ્ઠબાહુવિદલત્કોદણ્ડબાણાન્વિતમ્ ।
પાપઘ્નં વિશદાયતાક્ષિયુગલં સૌમિત્રિસંસેવિતં
    ભક્તાનાં પરમૌષધં મુનિવરૈઃ સંસ્તૂયમાનં ભજે ॥ ૬॥

રામં શ્યામલમેઘકોમલરુચિં રાકેન્દુબિમ્બાનનં
    રક્ષોઘ્નં રવિજાચિતં રઘુવરં રત્નોજ્જ્વલત્કુણ્ડલમ્ ।
રાજીવાક્ષમમાનુષં રણબલોદગ્રં રમાનુગ્રહં
    રાજેન્દ્રં રમણીયરૂપમસકૃદ્ધ્યાયે જગન્મોહનમ્ ॥ ૭॥

રામં રમ્યગુણં રમાપતિસમં રાકાશશાઙ્કાનનં
    રાજન્યં રમણીયરૂપમમલં રામાભિરામં હરિમ્ ।
રાજારાધિતપાદપદ્મમનિશં રાજન્યવિદ્ભાસિતં
    રાકેન્દુપ્રતિમં ધરાકુચયુગે વિન્યસ્તહસ્તં ભજે ॥ ૮॥

રામં કૌશિકગૌતમપ્રિયકરં સીતાપતિં સાનુજં
    રક્ષોઘ્નં વનવાસિનં ગુણનિધિં વિઘ્નઘ્નમાપ્તાર્કજમ્ ।
સેતોર્બન્ધનધીરવાનરબલં ધિક્કુમ્ભકર્ણેન્દ્રજિત્-
    પઙ્ક્તિગ્રીવમવદ્વિભીષણમજં શ્રીરામચન્દ્રં ભજે ॥ ૯॥

રામં કોમલનીલનીરદનિભં નીલાલકાલઙ્કૃતં
    કટ્યાં શોભિતકિઙ્કિણીઝણઝણધ્વાનૈરુપેતં શિશુમ્ ।
કણ્ઠાલમ્બિતરક્ષુનિર્મલનખં કઞ્જાક્ષમબ્જચ્છવિં
    ભાસ્વન્તં મકુટાઙ્ગદાદિવિવિધાકલ્પં સદાઽહં ભજે ॥ ૧૦॥

રામં સીતાસમેતં વિમલરવિશતાભાસમાનં રસાર્દ્રં
    શ્યામં દેદીપ્યમાનસ્મિતરુચિરમુખં કુણ્ડલોદ્ભાસિગણ્ડમ્ ।
શ્રીવત્સં શ્રીનિવાસં સુરતરુવિલસદ્રત્નસિંહાસનસ્થં
    દિવ્યાકલ્પોજ્જ્વલાઙ્ગં દિવિજપતિનુતં સન્તતં તં ભજેઽહમ્ ॥ ૧૧॥

જલનિધિકૃતસેતું દેવતાનન્દહેતું
    દશમુખમુખરક્ષોદારવૈધવ્યહેતુમ્ ।
મુનિજનનિવહાનાં મુક્તિસૌખ્યાદિહેતું
    રઘુવરકુલકેતું કીર્તયે ધર્મહેતુમ્ ॥ ૧૨॥

સકલગુણનિધાનં યોગિભિઃ સ્તૂયમાનં
    ભજતુ સુરવિમાનં રક્ષિતેન્દ્રાદિમાનમ્ ।
મહિતવૃષભયાનં સિતયા શોભમાનં
    સ્મરતુ હૃદયભાનું બ્રહ્મ રામાભિરામમ્ ॥ ૧૩॥

વરગુણમણિસિન્ધુર્મૈથિલીપ્રાણબન્ધુઃ
    કનકશિખરિધૈર્યો ભૂતમોભાનુસૂર્યઃ ।
દશરથનૃપરત્નો દેવતાગ્રૈકગણ્યો
    ભજિતભુવનભદ્રો પાતુ માં રામભદ્રઃ ॥ ૧૪॥

ત્રિદશકુમુદચન્દ્રો દાનવામ્ભોજચન્દ્રો
    દુરિતતિમિરચન્દ્રો યોગિનાં જ્ઞાનચન્દ્રઃ ।
પ્રણતનયનચન્દ્રો મૈથિલીનેત્રચન્દ્રો
    દશમુખરિપુચન્દ્રઃ પાતુ માં રામચન્દ્રઃ ॥ ૧૫॥

સ્વયુવતિકુલચન્દ્રં બન્ધુદુગ્ધાબ્ધિચન્દ્રં
    સુજનકુમુદચન્દ્રં વૈરિવક્ત્રાબ્જચન્દ્રમ્ ।
વિકસિતમુખચન્દ્રં વ્યાપ્તસત્કીર્તિચન્દ્રં
    સકલભુવનચન્દ્રં સન્તતં રામચન્દ્રમ્ ॥ ૧૬॥

ભેતાલં દશકણ્ઠકણ્ઠકદલીકન્દર્પદર્પાપહં

શ્રીકણ્ઠાકૃતિમાપ્લુવન્તમમલં ઘોરાસુરપ્રાણહમ્ ।
બાણં પ્રત્યુપસંહરન્તમતુલં બાણાસનોદ્યત્કરં
વન્દેઽરાતિભયાવહં મુનિનુતં રામં ઘનશ્યામલમ્ ॥ ૧૭॥

આકર્ણાન્તગુણોલ્લસચ્છરમજં કલ્પાન્તકાલોપમં
નેત્રાન્તારુણતાં વહન્તમનિશં પ્રહ્લાદદં નાકિનામ્ ।
પૌલસ્ત્યાસુરદૃષ્ટિચઞ્ચલકરં શસ્ત્રાસ્ત્રસન્ધાયિનં
બાણાનેકવિચિત્રહસ્તકુશલં શ્રીવીરરામં ભજે ॥ ૧૮॥

સ હિ માતા સ હિ તાતઃ સ હિ મમ તનયઃ સ એવ સોદર્યઃ ।
(ન હિ માતા ન હિ તાતો ન હિ મમ તનયઃ ન ચૈવ સોદર્યઃ ।)
ઇતિ મમ કુટિલે મૃત્યૌ રઘુપતિરયમેવ બન્ધુરાસન્નઃ ॥ ૧૯॥

દેવેન્દ્રેણ સમર્પિતે ધ્વજયુતે તત્સ્યન્દને સંસ્થિતં
સોત્કણ્ઠં સુરવૈરિવીર્યવિભવં જ્ઞાત્વા ભુજાસ્ફાલનમ્ ।
કૃત્વા સૂતયુતો દશાનનહરં તૂણીરસંસ્થં શરં
હૃત્વા જ્યાનિનદાત્કરોતિ ભયદં શ્રીવીરરામં ભજે ॥ ૨૦॥

રુચિરમણિકિરીટં સુન્દરભ્રૂલલાટં
કનકરુચિરચેલં કાશસદ્ભોગખેલમ્ ।
વિમલજલદનીલં કુણ્ડલોદ્ભાસિકર્ણં
રઘુકુલજનિરત્નં સન્તતં ચિન્તયામિ ॥ ૨૧॥

શ્રીવત્સાઙ્કમુદારકૌસ્તુભલસત્પીતામ્બરાલઙ્કૃતં
નાનારત્નવિરાજમાનમુકુટં નીલામ્બુદશ્યામલમ્ ।
કસ્તૂરીઘનસારચર્ચિતતનું મન્દારમાલાધરં
કન્દર્પાયુતસુન્દરં રઘુપતિં સીતાસમેતં ભજે ॥ ૨૨॥

યન્નામૈવ સહસ્રનામસદૃશં યન્નામ વેદૈઃ સમં
યન્નામાઙ્કિતવાક્યમાસુરબલસ્ત્રીગર્ભવિચ્છેદકમ્ ।
યન્નામ શ્વપચાર્યભેદરહિતં મુક્તેઃ સદા દાયકં
યન્નામ્ના રઘુરામનામરમણં શ્રીરામનામામૃતમ્ ॥ ૨૩॥

રામં રાક્ષસમર્દનં રઘુવરં દૈતેયવિધ્વંસિનં
સુગ્રીવેપ્સિતરાજ્યદં સુરપતિં દૈત્યાન્તકં શાર્ઙ્ગિણમ્ ।
ભક્તાનામભયપ્રદં ભયહરં પાપૌઘવિધ્વંસિનં
સામીરિસ્તુતપાદપદ્મયુગલં સીતાસમેતં ભજે ॥ ૨૪॥

રામં રક્તસરોરુહાક્ષમમલં લઙ્કાધિનાથાન્તકં
    કૌસલ્યાનયનોત્સુકં રઘુવરં નાગેન્દ્રતલ્પસ્થિતમ્ ।
વૈદેહીકુચકુમ્ભકુઙ્કુમરજોઽલઙ્કારકારં હરિં
    માયામાનુષવિગ્રહં રઘુપતિં સીતાસમેતં ભજે ॥ ૨૫॥

રામં હેમતટિત્પ્રભાંશુકધરં વીરાસને સંસ્થિતં
    બાલં નીલમણિપ્રભં મધુરિપું દૈત્યેન્દ્રગર્વાપહમ્ ।
વિશ્વામિત્રવસિષ્ઠવાનરવરૈઃ સંસેવ્યમાનં સદા
    નિત્યં ભાસ્કરચન્દ્રકોટિસદૃશં સીતાસમેતં ભજે ॥ ૨૬॥

શત્રુઘ્નો વ્યજનાઙ્કિતોઽપિ ભરતઃ પાર્શ્વદ્વયે પશ્ચિમે
    છત્રં ચામરસંયુતં કલિતવાન્ સંસેવતે લક્ષ્મણઃ ।
મૂલે કલ્પતરોર્વિમાનવિલસન્માણિક્યસિંહાસને
    પદ્માસ્યં મુનિસેવિતં રઘુપતિં સીતાસમેતં ભજે ॥ ૨૭॥

વામાઙ્કોપરિ તપ્તકાઞ્ચનનિભં સીતાસમાલોકિતં
    હસ્તાભ્યાં ધૃતછત્રચામરધૃતા સૌમિત્રિણા સેવિતમ્ ।
નિત્યં પૂજિતપાદપદ્મયુગલં દેવૈઃ સુરેન્દ્રાદિભિઃ
    સેવ્યં માનુષરાક્ષસૈઃ કપિવરૈઃ શ્રીરામચન્દ્રં ભજે ॥ ૨૮॥

કસ્તૂરીતિલકઙ્કપીન્દ્રહરણં કારુણ્યવારાન્નિધિં
    ક્ષીરામ્ભોધિસુતામુખાબ્જમધુપં કલ્યાણરામં વિધિમ્ ।
કૌસલ્યાનયનોત્સુકં કપિવરત્રાણં મહાપૌરુષં
    કામારિપ્રિયમર્કકોટિસદૃશં સીતાસમેતં ભજે ॥ ૨૯॥

વિદ્યુત્કોટિદિવાકરદ્યુતિનિભં શ્રીકૌસ્તુભાલઙ્કૃતં
    યોગીન્દ્રૈઃ સનકાદિભિઃ પરિવૃતં કૈલાસનાથપ્રિયમ્ ।
મુક્તારત્નકિરીટકુણ્ડલધરં ગ્રૈવેયહારાન્વિતં
    વૈદેહીકુચસન્નિવાસમનિશં સીતાસમેતં ભજે ॥ ૩૦॥

શ્યામલમમ્બુજાતનયનં વિસ્તીર્ણવક્ષઃસ્થલં
    બાહુદ્વન્દ્વવિરાજિતં સુવદનં શોણાઙ્ઘ્રિપઙ્કેરુહમ્ ।
નાનારત્નવિચિત્રભૂષણયુતં કોદણ્ડબાણાઙ્કિતં
    ત્રૈલોક્યપ્રતિમાનસુન્દરતનું સીતાસમેતં ભજે ॥ ૩૧॥

વિદ્યુત્કોટિસહસ્રભાનુસદૃશં સિંહાસને સંસ્થિતં

મૂલે કલ્પતરોર્મહામણિમયે ભાન્તં પરેશં વિભુમ્ ।
સુગ્રીવાઙ્ગદજામ્બવાદિહરિભિઃ સંસેવ્યમાનં હરિં
શમ્ભુબ્રહ્મસુરારિભિઃ પરિવૃતં સીતાસમેતં ભજે ॥ ૩૨॥

દિવ્યારણ્યયતીન્દ્રનામનગરે મધ્યે મહામણ્ડપે
સ્વર્ણસ્તમ્ભસહસ્રષોડશયુતે મન્દારમૂલાશ્રિતે ।
નાનારત્નવિચિત્રનિર્મલમહાસિંહાસને સંસ્થિતં
સીતાલક્ષ્મણસેવિતં રઘુપતિં સીતાસમેતં ભજે ॥ ૩૩॥

યત્પાદામ્બુજસમ્ભવા ત્રિપથગા ભાગીરથી મુક્તિદા
લોકાનાં હતકિલ્બિષા ભગવતી મન્દાકિની શામ્ભવી ।
લોકે ભાતિ સરસ્વતી સુરનદી પૂર્ણેન્દુકાન્તિપ્રભા
તં વિષ્ણું ભરતાગ્રજં રઘુવરં સીતાસમેતં ભજે ॥ ૩૪॥

યત્પાદામ્બુજરેણુના મુનિસતી મુક્તિં ગતા યન્મહા-
પુણ્યં પાતકનાશને ત્રિજાતાં ભાતિ સ્મૃતા પાવિની ।
સ્મૃત્વા રાઘવમપ્રમેયમમલં પુર્ણેન્દુમન્દસ્મિતં
તં રામં સરસીરુહાક્ષમમલં સીતાસમેતં ભજે ॥ ૩૫॥

વૈદેહીકુચમણ્ડલાગ્રવિલસન્માણિક્યહસ્તામ્બુજં
કાઞ્ચીકઙ્કણહારનૂપુરલસત્કેયૂરહારાન્વિતમ્ ।
દિવ્યશ્રીમણિકુણ્ડલોજ્જ્વલમહાભૂષાસહસ્રાન્વિતં
વીરં શ્રીરઘુવીરપુઙ્ગવં ગુણનિધિં સીતાસમેતં ભજે ॥ ૩૬॥

વૈદેહીકુચમણ્ડલોપરિલસન્માણિક્યહારાવલી-
મધ્યસ્થં નવનીતકોમલરુચિં નીલોત્પલશ્યામલમ્ ।
કન્દર્પાયુતકોટિસુન્દરતનું પૂર્ણેન્દુબિમ્બાનનં
કૌસલ્યાકુલભૂષણં રઘુપતિં સીતાસમેતં ભજે ॥ ૩૭॥

વૈદેહીયુતવામભાગમતુલં વન્દારુમન્દારકં
વન્દે પ્રસ્તુતકીર્તિવાસિતતરુચ્છાયાનુકારિપ્રભમ્ ।
વૈદેહીકુચકુઙ્કુમાઙ્કિતમહોરસ્કં મહાભૂષણં
વેદાન્તૈરુપગીયમાનમસકૃત્સીતાસમેતં ભજે ॥ ૩૮॥

વૈદેહીસ્તનકુમ્ભસમ્ભ્રમપરીરમ્ભાવૃતં સિન્ધુગં
રાકાચન્દ્રનિભાનનં રઘુવરં રાજીવપત્રેક્ષણમ્ ।
પ્રાવૃણ્મેઘનિભદ્યુતિં સ્મિતયુતં હારાવલીભૂષિતં

શ્રીરામં પ્રણમામિ ભક્તજનતાચિન્તામણિં સન્તતમ્ ॥ ૩૯॥

વૈદેહીરમણં હિરણ્યતિલકં વિશ્વમ્ભરાપાલકં
વર્ષિષ્ઠં વિવિધાયુધેષુ નિપુણં વિદ્વજ્જનશ્રીકરમ્ ।
વિદ્યાવાસગૃહં વિયચ્ચરનુતં વિદ્યુત્પ્રકાશામ્વરં
વિપ્રત્રાણવિધેયમાદિપુરુષં શ્રીરામચન્દ્રં ભજે ॥ ૪૦॥

વૈદેહીવશવર્તિનં રણજિતં રત્નાકરાગારિણં
પઙ્ક્તિગ્રીવમદાપહં પટુભુજં પદ્માપ્તકોટિપ્રભમ્ ।
વિષ્ણું જિષ્ણુમવાર્યશૌર્યનિલયં નીલામ્બુદશ્યામલં
રત્નાલઙ્કરણાન્વિતં રઘુપતિં શ્રીરામચન્દ્રં ભજે ॥ ૪૧॥

દેવાનાં હિતકારિણં સુભુવને કૃત્વાઽવતારં ધ્રુવં
રામં કૌશિકયજ્ઞવિઘ્નદનુજઘ્નં તાટકાસંહરમ્ ।
નિત્યં ગૌતમપત્નિશાપદલનશ્રીપદરેણું શુભં
શમ્ભોરુત્કટચાપખણ્ડનમહાસત્ત્વં ભજે રાઘવમ્ ॥ ૪૨॥

રાજીવનેત્ર રઘુપુઙ્ગવ રામભદ્ર
રાકેન્દુબિમ્બસદૃશાનન નીલગાત્ર ।
રામાભિરામ રઘુવંશસમુદ્ભવ ત્વં
શ્રીરામચન્દ્ર મમ દેહિ કરાવલમ્બમ્ ॥ ૪૩॥

મુકુરરુચિરગણ્ડં પુણ્ડરીકાભતુણ્ડં
કરિકરભુજદણ્ડં રૌદ્રતેજોઽગ્નિકુણ્ડમ્ ।
નમિતભુવનષણ્ડં ભેદિતોગ્રારિમુણ્ડં
ગુણનિકરકરણ્ડં નૌમિ રામપ્રચણ્ડમ્ ॥ ૪૪॥

કોદણ્ડકાણ્ડવિનિવેશિતબાહુદણ્ડં
આખણ્ડલાદ્યમરવર્ષિતપુષ્પવર્ષમ્ ।
આયોધનસ્થિતિરજઃપરિધૂસરાઙ્ગં
અવ્યૂતિદં રઘુવરેન્દ્રમરિપ્રભેદમ્ ॥ ૪૫॥

સેવ્યં શ્રીરામમન્ત્રં શ્રવણશુભકરં શ્રેષ્ઠસુજ્ઞાનમન્ત્રં
સ્તવ્યં શ્રીરામમન્ત્રં નરકદુરિતદુર્વારનિર્ઘાતમન્ત્રમ્ ।
ભવ્યં શ્રીરામમન્ત્રં ભજતુ ભજતુ સંસારનિસ્તારમન્ત્રં
દિવ્યં શ્રીરામમન્ત્રં દિવિ ભુવિ વિલસન્મોક્ષરક્ષૈકમન્ત્રમ્ ॥ ૪૬॥

આજાનુબાહુમરવિન્દદૃશં શુભાઙ્ગં
    રાજાધિરાજમઘરાજિતમઃપતઙ્ગમ્ ।
શ્રીજાનકીમુખસરોરુહમત્તભૃઙ્ગં
    શ્રીમાનિતં હૃદિ ભજામિ કૃપાન્તરઙ્ગમ્ ॥ ૪૭ ॥

એકેન બાણમપરેણ કરેણ ચાપં
    હર્ષં વહન્તમસમાનજટાશિરસ્કમ્ ।
સીતાસહાયમનુજેન સહાચરન્તં
    શ્રીરામચન્દ્રમનિશં કલયામિ ચિત્તે ॥ ૪૮ ॥

આમીલયન્દશશિરોવદનામ્બુજાતં
    ઉન્મીલયન્ જનકજાનયનોત્પલે ચ ।
આનન્દયન્સકલજીવચકોરરાશિં
    શ્રીરામચન્દ્રમનિશં કલયામિ ચિત્તે ॥ ૪૯ ॥

રામં પુરાણપુરુષં રમણીયવેષં
    રાજાધિરાજમુકુટાર્ચિતપાદપીઠમ્ ।
સીતાપતિં સુનયનં જગદેકવીરં
    શ્રીરામચન્દ્રમનિશં કલયામિ ચિત્તે ॥ ૫૦ ॥

સિંહાસનસ્થં સુરસેવિતવ્યં રત્નાઙ્કિતાલઙ્કૃતપાદપદ્મમ્ ।
સીતાસમેતં શશિસૂર્યનેત્રં રામં ભજે રાઘવરામચન્દ્રમ્ ॥ ૫૧ ॥

સુગ્રીવમિત્રં શુભનામરૂપં લઙ્કાહરં રાક્ષસવંશનાશમ્ ।
વેદાશ્રયાઙ્ગં વિપુલાયતાક્ષં રામં ભજે રાઘવરામચન્દ્રમ્ ॥ ૫૨ ॥

અનન્તકીર્તિં વરદં પ્રસન્નં પદ્માસનં સેવકપારિજાતમ્ ।
રાજાધિરાજં રઘુવીરકેતું રામં ભજે રાઘવરામચન્દ્રમ્ ॥ ૫૩ ॥

પદ્માસનસ્થં સુરસેવિતવ્યં પદ્માલયાનન્દકટાક્ષવીક્ષમ્ ।
ગન્ધર્વવિદ્યાધર ગીયમાનં રામં ભજે રાઘવરામચન્દ્રમ્ ॥ ૫૪ ॥

અચિન્ત્યમવ્યક્તમનન્તરૂપં અદ્વૈતમાનન્દમનાદિગમ્યમ્ ।
પુણ્યસ્વરૂપં પુરુષોત્તમાખ્યં રામં ભજે રાઘવરામચન્દ્રમ્ ॥ ૫૫ ॥

મન્દસ્મિતં કુણ્ડલગણ્ડભાગં પીતામ્બરં ભૂષણભૂષિતાઙ્ગમ્ ।
નીલોત્પલાઙ્ગં ભુવનૈકમિત્રં રામં ભજે રાઘવરામચન્દ્રમ્ ॥ ૫૬ ॥

ડિણ્ડીરહાસમણિકુણ્ડલચારુકર્ણ-

દોર્દણ્ડશૌર્યજિતખણ્ડનશૌર્યધીર ।
કોદણ્ડકાણ્ડપરિમણ્ડિતપાર્થિવેન્દ્ર
વેતણ્ડયાન જય રાઘવ રામચન્દ્ર ॥ ૫૭॥

લોકાન્ સપ્ત નિનાદયન્ હરિહયાશ્વં ભ્રામયન્નિન્ધયન્
સપ્તાખ્યે ભુવને પ્રકમ્પમુદયન્ સપ્તાર્ણવાન્ ઘૂર્ણયન્ ।
ઉન્મૂલાનિ રસાતલાનિ જનયન્ સપ્તાપિ પૃથ્વીધરાન્
સુશ્રીરાઘવબાહુદણ્ડવિદલત્કોદણ્ડચણ્ડધ્વનિઃ ॥ ૫૮॥

બ્રહ્માણ્ડં દલયન્ વિયદ્વિદલયન્ ભોગીશભોગસ્થલે
સન્ત્રાસં જનયન્ સમુદ્રપટલીતોયં સમુદ્વેલયન્ ।
દિક્પાલાનતિક્ષોભયન્ કુલગિરીન્ દીર્ણત્વમાપાદયન્
નક્ષત્રાણિ ચ પાતયન્ વિલસતે શૌરેર્ધનુર્જ્યારવઃ ॥ ૫૯॥

યશ્ચણ્ડગામ્ભીર્યધનુર્વિતેજોભૂમણ્ડલીત્રાણકૃતાવતારઃ ।
અખણ્ડલાદ્યૈરમરૈરુપાસ્યઃ કોદણ્ડપાણિઃ કુલદૈવતં નઃ ॥ ૬૦॥

વૈદેહ્યા સહ રાજમાનમનિશં સૌવર્ણસિંહાસને
મન્દારદ્રુમવાટિકાન્તરમહા શ્રીચન્દ્રકાન્તાલયે ।
કૈકેયીજનિમાઞ્જનેયસહિતં સૌમિત્રિણા સેવિતં
મેઘશ્યામમુદારહાસવદનં શ્રીરામચન્દ્રં ભજે ॥ ૬૧॥

વૈદેહ્યા પુલકાઙ્કુરાર્ચિતતનુર્વ્યાલમ્બહસ્તામ્બુજઃ
હસ્તે મોદિતરત્નકઙ્કણરવઃ કલ્પદ્રુમાણાં વને ।
પાદાભ્યાં મણિપાદુકાદ્યુતિકરં પ્રેઙ્ખન્નખાભ્યાં ચરન્
ઇષ્ટાલાપસુધારસં દિશતુ મે શ્રીરામચન્દ્રં ભજે ॥ ૬૨॥

વામાઙ્કસ્થિતજાનકીકુચયુગે વિસ્રસ્તહસ્તામ્બુજં
ઉજ્જૃમ્ભાનનપઙ્કજં પરિલસદ્વિસ્પષ્ટબિમ્બાધરમ્ ।
સત્તારેણ વિશિષ્ટકઙ્કણરવે ઓઙ્કારશબ્દાશ્રયે
ભાન્તં શારદચન્દ્રહાસમનિશં વન્દે સદા રાઘવમ્ ॥ ૬૩॥

વૈદેહીસહિતં સુલક્ષ્મણયુતં કૈકાસુતં સાનુગં
સુગ્રીવં ચ વિભીષણાનિલસુતૌ નીલં નલં સાઙ્ગદમ્ ।
વિશ્વામિત્રવસિષ્ઠગૌતમભરદ્વાજાનુસંસેવિતં
રામં મારુતિસેવિતં સ્મર મનઃ સામ્રાજ્યસિંહાસને ॥ ૬૪॥

રામઃ પ્રાઞ્જલિમગ્રતોઽનિલસુતં સૌભ્રાત્રમાદર્શયન્
    છત્રાચામરયુગ્મભાસિતકરાન્ પશ્ચાત્સ્થલે પાર્શ્વયોઃ ।
વામાઙ્ગે ચ નિજાન્ વિભીષણમુખાન્ સમ્ભાવયન્ બોધયન્
    ધીમુદ્રાકરતત્ત્વરૂપમવતાત્ સામ્રાજ્યસિંહાસને ॥ ૬૫॥

પૌગણ્ડે હિતબાલકૈઃ પરિવૃતઃ પૂર્ણેન્દુકાન્તાનનઃ
    પ્રીત્યા બદ્ધવિચિત્રહેમવસને સંસક્તકાઞ્ચીગુણઃ ।
આજાનુપ્રવિલમ્બિબાહુયુગલઃ શ્યામામ્બુભૃદ્વિગ્રહઃ
    ભ્રાતૃવ્યાનુચરશ્ચરાચરગુરુઃ પાયાત્સ વો રાઘવઃ ॥ ૬૬॥

વૈદેહીરમણીયવક્ત્રવનજપ્રદ્યોતખદ્યોતનં
    કેલીસદ્મનિ રત્નદીપકલિકાકાન્તે વસન્તં હરિમ્ ।
સૌરભ્યપ્રસવપ્રયુક્તવિલસચ્છાયાન્તરે શાયિનં
    શ્રીમન્તં રઘુવંશદીપકમણિં શ્રીરામચન્દ્રં ભજે ॥ ૬૭॥

રામો બદ્ધપયોનિધિર્ગુણનિધિર્ગત્વાઽથ પારેઽમ્બુધેઃ
    લઙ્કાં પ્રાપ્ય સકુમ્ભકર્ણદનુજં હત્વા રણે રાવણમ્ ।
તત્રાસ્થાપ્ય વિભીષણં પુનરગાત્સીતાપતિઃ પુષ્પકં
    ચારૂઢઃ પુનરાગતઃ સ ભૃતવાન્ ધાત્રીમજઃ પાતુ નઃ ॥ ૬૮॥

રત્નોલ્લસજ્જ્વલિતકુણ્ડલગણ્ડભાગં
    કસ્તૂરિકાતિલક શોભિતભાલભાગમ્ ।
કર્ણાન્તદીર્ઘનયનં કરુણાકટાક્ષં
    શ્રીરામચન્દ્રમુખમાત્મનિ સન્નિધત્તામ્ ॥ ૬૯॥

હેલાભગ્નશશાઙ્કશેખરધનુર્ભૂમણ્ડલાખણ્ડલ-
    શ્રેણીમૌલિલસદ્વિનૂત્નમણિભિર્દીપ્તાઙ્ઘ્રિપઙ્કેરુહઃ ।
કલ્યાણં જનયત્યખણ્ડવિભવઃ કલ્યાણલીલોત્સવે
    માર્તાણ્ડાન્વયમણ્ડનશ્ચ ભવતાદાવિઃ સ રામઃ સદા ॥ ૭૦॥

વિદ્યુત્સ્ફુરન્મકરકુણ્ડલદીપ્તચારુ-
    ગણ્ડસ્થલં મણિકિરીટવિરાજમાનમ્ ।
પીતામ્બરં જલદનીલમુદારકીર્તિં
    શ્રીરામચન્દ્રમનિશં કલયામિ ચિત્તે ॥ ૭૧॥

કરતલધૃતચાપં કાલમેઘસ્વરૂપં
    સરસિજદલનેત્રં ચારુહાસં સુગાત્રમ્ ।

વિચિનુત વનવાસે વિક્રમોદગ્રવેષં
    પ્રણમત રઘુનાથં જાનકીપ્રાણનાથમ્ ॥ ૭૨॥

યઃ પૃથ્વીભરવારણાય દિવિજૈઃ સમ્પ્રાર્થિતશ્ચિન્મયઃ
    સઞ્જાતઃ પૃથિવીતલે રવિકુલે માયામનુષ્યોઽવ્યયઃ ।
નિશ્ચક્રં હતરાક્ષસં પુનરગાદ્બ્રહ્મત્વમદ્ય સ્થિરાં
    કીર્તિં પાપહરાં વિધાય જગતાં તં જાનકીશં ભજે ॥ ૭૩॥

વિશ્વોદ્ભવસ્થિતિલયાદિષુ હેતુમેકં
    માયાશ્રયં વિગતમાયમચિન્ત્યમૂર્તિમ્ ।
આનન્દસાન્દ્રમમલં નિજબોધરૂપં
    સીતાપતિં વિદિતતત્ત્વમહં નમામિ ॥ ૭૪॥

શ્રીરામં નવરત્નકુણ્ડલધરં શ્રીરામરક્ષામણિં
    શ્રીરામં ચ સહસ્રભાનુસદૃશં શ્રીરામચન્દ્રોદયમ્ ।
શ્રીરામં શ્રુતકીર્તિમાકરમહં શ્રીરામમુક્તિપ્રદં
    શ્રીરામં રઘુનન્દનં ભયહરં શ્રીરામચન્દ્રં ભજે ॥ ૭૫॥

રામઃ પાતુ સદૈવ મામરિભયાદ્રામં સદા ભાવયે
    રામેણૈવ હૃતં મહત્તરતમો રામાય નિત્યં નમઃ ।
રામાન્નાસ્તિ પરં પદં સુલલિતૌ રામસ્ય પાદૌ ભજે
    રામે પ્રીતિરચઞ્ચલાઽસ્તુ મમ હે શ્રીરામ માં પાલય ॥ ૭૬॥

રામમિન્દીવરશ્યામં રાજીવાયતલોચનમ્
જ્યાઘોષનિર્જિતારાતિં જાનકીરમણં ભજે ॥ ૭૭॥

હત્વા યુદ્ધે દશાસ્યં ત્રિભુવનવિષમં વામહસ્તેન ચાપં
    ભૂમાવષ્ટભ્ય તિષ્ઠન્નિતરકરધૃતં ભ્રામયન્બાણમેકમ્ ।
આરક્તોપાન્તનેત્રે શરદલિતવપુઃ કોટિસૂર્યપ્રકાશઃ
    વીરશ્રીબન્ધુરાઙ્ગસ્ત્રિદશપતિનુતઃ પાતુ માં વીરરામઃ ॥ ૭૮॥

યુદ્ધે સન્નદ્ધશસ્ત્રં કપિવરભયદં કુમ્ભકર્ણં સુરારિં
    બાણેનૈકેન સદ્યઃ પ્રકટિતહુતભુગ્વિશ્વરોષારુણાક્ષમ્ ।
હત્વા કૃત્વા પ્રમોદં સુરકપિવિતતેર્મૌનિવૃન્દૈકસેવ્યં
    વીરશ્રીબન્ધુરાઙ્ગસ્ત્રિદશપતિનુતઃ પાતુ માં વીરરામઃ ॥ ૭૯॥

દૈતેયોદગ્રસેવ્યં પટુતરવિશિખં ભીષણં ઘોરનાદં

દેવેન્દ્રસ્તૂયમાનઃ સ્ફુટવરનિકરાનન્ધકાદીંશ્ચ હત્વા ।
દિક્પાલાન્ પ્રાપ્ય ભોગાન્ મણિરુચિસુભગાન્ દિક્ષુ તાન્ દાપયિત્વા
વીરશ્રીબન્ધુરાઙ્ગસ્ત્રિદશપતિનુતઃ પાતુ માં વીરરામઃ ॥ ૮૦॥

કૌસલ્યાવીરગર્ભામ્બુધિઘનવિલસત્પૂર્ણચન્દ્રઃ પ્રતાપઃ
મૌનીન્દ્રસ્વાન્તપદ્મપ્રવિમલતરુણીધર્મનૈપુણ્યરૂઢઃ ।
મારીચં રાક્ષસેન્દ્રં નિજશરદહનાયાહુતિં કલ્પયિત્વા
વીરશ્રીબન્ધુરાઙ્ગસ્ત્રિદશપતિનુતઃ પાતુ માં વીરરામઃ ॥ ૮૧॥

યો દણ્ડકારણ્યનિશાચરેન્દ્રાન્ કોદણ્ડલીલાવિષયીચકાર ।
વેતણ્ડશુણ્ડાયતબાહુદણ્ડઃ કોદણ્ડપાણિઃ કુલદૈવતં નઃ ॥ ૮૨॥

તરુણૌ રૂપસમ્પન્નૌ સુકુમારૌ મહાબલૌ ।
પુણ્ડરીકવિશાલાક્ષૌ ચીરકૃષ્ણાજિનામ્બરૌ ॥ ૮૩॥

ફલમૂલાશનૌ દાન્તૌ તાપસૌ ધર્મચારિણૌ ।
રક્ષઃકુલનિહન્તારૌ ભ્રાતરૌ રામલક્ષ્મણૌ ॥ ૮૪॥

કલ્યાણાનાં નિદાનં કલિમલદહનં પાવનં પાવનાનાં
પાથેયં યન્મુમુક્ષોઃ સપદિ પરમપ્રાપ્તયે પ્રસ્થિતસ્ય ।
વિશ્રામસ્થાનમેકં કવિવરવચસાં જીવનં સજ્જનાનમ્
બીજં ધર્મદ્રુમસ્ય પ્રભવતિ ભવતાં ભૂતયે રામનામ ॥ ૮૫॥

કૌસલ્યાનયનેન્દું દશરથમુખારવિન્દમાર્તાણ્ડમ્ ।
સીતામાનસહંસં રામં રાજીવલોચનં વન્દે ॥ ૮૬॥

દીર્ઘબાહુમરવિન્દલોચનં દીનવત્સલમનાથરક્ષણમ્ ।
દીક્ષિતં સકલલોકરક્ષણે દૈવતં દશરથાત્મજં ભજે ॥ ૮૭॥

સત્યેન લોકાઞ્જયતિ દીનાન્દાનેન રાઘવઃ ।
ગુરું શુશ્રૂષયા વીરો ધનુષા યુધિ શાત્રવાન્ ॥ ૮૮॥

ભર્જનં ભવબીજાનામાર્જનં સુખસમ્પદામ્ ।
તર્જનં યમદૂતાનાં રામરામેતિ ગર્જનમ્ ॥ ૮૯॥

સકૃત્પ્રણતરક્ષી યઃ સાક્ષી યસ્ય વિભીષણઃ ।
સાપરાધાપ્રતીકારઃ સ શ્રીરામો ગતિર્મમ ॥

ન જાને જાનકીજાને રામ ત્વન્નામવૈભવમ્ ।

સ વેત્તિ ભગવાન્શમ્ભુઃ વાલ્મીકિર્વેત્તિ વા ન વા ॥ ૯૦॥

કૃત્યાકૃત્યવિવેકહીનમનસાં હત્યાદિભિર્જીવિનાં
　　અત્યન્તં બહુતારકં તનુભૃતામત્યન્ત રમ્ભાદિના ।
સત્યાનન્દમયં સમસ્ત નિગમસ્તુત્યાસ્પદં સમ્પદાં
　　સ્થાનં શ્રીરઘુરામનામમમલં નિત્યં સ્મરન્મુચ્યતે ॥ ૯૧॥

સાકેતે સ્વનિકેતને સુરતરોર્મૂલે લસદ્વેદિકે
　　હૈમે રત્નમયં દધાનમપરં હસ્તામ્બુજં જાનુનિ ।
સીતાં પાર્શ્વગતાં સરોરુહકરાં વિદ્યુન્નિભાં રાઘવં
　　પશ્યન્તં પરિપૂર્ણચન્દ્રવદનં ભાસ્વત્કિરીટં ભજે ॥ ૯૨॥

વિદ્યુદ્વર્ણોપમાઙ્ગીં વિકચદલમુખીં વિદ્રુમાભાધરોષ્ઠીં
　　વેતણ્ડૌદ્ધત્યકુમ્ભપ્રતિકુચયુગલાં વેદિમધ્યાવતંસામ્ ।
શ્યામાભાં ફુલ્લપદ્મચ્છદનિભનયનાં ચારુહાસાં સુનાસાં
　　સીતાં શ્રીરામદેવીં શ્રિતજનવરદાં ચિન્તયેઽનન્તમૂર્તિમ્ ॥ ૯૩॥

માણિક્યમઞ્જીરપદારવિન્દાં રામાર્કવત્ફુલ્લમુખારવિન્દામ્ ।
ભક્તપ્રદાતૃત્વકરારવિન્દાં દેવીં ભજે રાઘવવલ્લભાં તામ્ ॥ ૯૪॥

જયતુ વિજયકારી જાનકીમોદધારી
　　તપનકુલવિહારી દણ્ડકારણ્યચારી ।
દશવદનકુઠારી દૈત્યવિચ્છેદકારી
　　મણિમુકુટકધારી ચણ્ડકોદણ્ડધારી ॥ ૯૫॥

ચેતઃ સ્થિતં ચિન્તિતચિન્તનીયં ચિન્તાહરં ચિન્તિતપારિજાતમ્ ।
અચિન્તનીયં બહુ ચિન્તયેઽહં ત્વામેવ રામં ભુવનાભિરામમ્ ॥ ૯૬॥

સાકેતે શરદિન્દુકુન્દધવલે સૌધે મહામણ્ડપે
　　પર્યસ્તાગરુધૂપધૂમપટલે કર્પૂરદીપોજ્જ્વલે ।
સુગ્રીવાઙ્ગદવાયુપુત્રસહિતં સૌમિત્રિણા સેવિતં
　　લીલામાનુષવિગ્રહં રઘુપતિં રામં ભજે શ્યામલમ્ ॥ ૯૭॥

રામઃ પિતા રાઘવ એવ માતા રામોઽથ બન્ધુશ્ચ સખા સખી વા ।
રામો ગુરુર્મે પરમં ચ દૈવં રામં વિના નાન્યમહં સ્મરામિ ॥ ૯૮॥

યા કૃપા મુનિસન્ત્રાણે યા કૃપા કપિનાયકે ।
યા વિભીષણરક્ષાયાં સા રામ મમ દીયતામ્ ॥ ૯૯॥

દયાનિધે રાઘવ રામચન્દ્ર
    નિરસ્વ પાપાનિ મમાબલાનિ ।
ત્વય્યેવ ભક્તિં સુદૃઢાં પ્રયચ્છ
    સૈવ પ્રસૂતે હ્યખિલાનભીષ્ટાન્ ॥ ૧૦૦॥

અક્ષીણબાણતૂણીરઃ સમારોપિતકાર્મુકઃ ।
દશગ્રીવશિરોહર્તા શ્રીરામઃ શરણં મમ ॥ ૧૦૧॥

શ્રીરામ મે ત્વં હિ પિતા ચ માતા
    શ્રીરામ મે ત્વં હિ સુહૃચ્ચ બન્ધુઃ ।
શ્રીરામ મે ત્વં હિ ગુરુર્ગરિષ્ઠઃ
    શ્રીરામ મે ત્વં હિ સમસ્તમેવ ॥ ૧૦૨॥

પટુતરજલવાહધ્વાનમાદાય ચાપં
    પવનજવનવેગં બાણમાકૃષ્ય તૂણાત્ ।
અભયવચનદાયી સાનુજઃ સર્વતો મે
    રણહરદનુજેન્દ્રો રામચન્દ્રઃ સહાયઃ ॥ ૧૦૩॥

કૌસલ્યાલસદાલવાલજનિતઃ સીતાલતાલિઙ્ગિતઃ
    સિક્તઃ પઙ્ક્તિરથેન સોદરમહાશાખાભિરત્યુન્નતઃ ।
રક્ષસ્તીક્ષ્ણનિદાઘપાટનપટુશ્છાયાભિરાનન્દકૃત્
    યચ્છન્ વાઞ્છિતસત્ફલાનિ ભવતુ શ્રીરામકલ્પદ્રુમઃ ॥ ૧૦૪॥

નિગમશિશિરરત્નં નિત્યમાશાસ્યરત્નં
    જનનુતનૃપરત્નં જાનકીરૂપરત્નમ્ ।
ભુવનવલયરત્નં ભૂભુજામેકરત્નં
    રઘુકુલવરરત્નં પાતુ માં રામરત્નમ્ ॥ ૧૦૫॥

વિશાલનેત્રં પરિપૂર્ણગાત્રં સીતાકલત્રં સુરવૈરિજૈત્રમ્ ।
કારુણ્યપાત્રં જગતઃ પવિત્રં શ્રીરામરત્નં પ્રણતોઽસ્મિ નિત્યમ્ ॥ ૧૦૬॥

શ્રીરામચન્દ્રઃ શ્રિતપારિજાતઃ સમસ્તકલ્યાણ ગુણાભિરામઃ ।
સીતામુખામ્ભોરુહચઞ્ચરીકો નિરન્તરં મઙ્ગલમાતનોતુ ॥ ૧૦૭॥

ઇન્દીવરદલશ્યામઃ પુણ્ડરીકનિભેક્ષણઃ ।
ધૃતકોદણ્ડતૂણીરો રામ એવ ગતિર્મમ ॥ ૧૦૮॥

ઇચ્છામો હિ મહાબાહું રઘુવીરં મહાબલમ્ ।

ગજેન મહતા યાતં રામં છત્રાવૃતાનનમ્ ॥ ૧૦૯॥

રામો નામ બભૂવ હું તદબલા સીતેતિ હું તૌ પિતુઃ
વાચા પઞ્ચવટીવને વિહરતસ્તામાહરદ્રાવણઃ ।
નિદ્રાર્થં જનની કથામિતિ હરેર્હુઙ્કારતઃ શ઼ૃણ્વતા
સૌમિત્રે ક્વ ધનુર્ધનુરિતિ વ્યગ્રા ગિરઃ પાતુ નઃ ॥ ૧૧૦॥

શ્રીરામચન્દ્રેતિ દયાપરેતિ
ભક્તિપ્રિયેતિ ભવબન્ધનમોચનેતિ ।
નાથેતિ નાગશયનેતિ સદા સ્તુવન્તં
માં પાહિ ભીતમનિશં કૃપણં કૃતઘ્નમ્ ॥ ૧૧૧॥

રામચન્દ્રચરિતામૃતપાનં સોમપાનશતકોટિસમાનમ્ ।
સોમપાનશતકોટિભિરેવ જન્મ નૈતિ રઘુનાયકનામ્ના ॥ ૧૧૨॥

રામ રામ દયાસિન્ધો રામનાથ જગત્પતે ।
ત્વત્પાદકમલાસક્તિર્ભવેજ્જન્મનિ જન્મનિ ॥ ૧૧૩॥

શ્રીરાઘવં રામચન્દ્રં રાવણારિં રમાપતિમ્ ।
રાજીવલોચનં રામં તં વન્દે રઘુનાયકમ્ ॥ ૧૧૪॥

યત્પાદપઙ્કજરજઃ શ્રુતિભિર્વિમૃગ્યં
યન્નાભિષઙ્ગજભવઃ કમલાસનઃ સ્યાત્ ।
યન્નામસારરસિકો ભગવાન્ પુરારિઃ
તં રામચન્દ્રમનિશં હૃદિ ભાવયામિ ॥ ૧૧૫॥

યસ્યાવતારચરિતાનિ વિરિઞ્ચલોકે
ગાયન્તિ નારદમુખા ભવપદ્મજાદ્યાઃ ।
આનન્દજાશ્રુપરિષિક્તકુચાગ્રસીમા
વાગીશ્વરી ચ તમહં શરણં પ્રપદ્યે ॥

રામચન્દ્રચરણારવિન્દયોરન્તરઙ્ગચરભૃઙ્ગલીલયા ।
તત્ર સન્તિ ચ રસાશ્ચતુર્વિધાઃ માકરન્દરસ એવ પઙ્કજે ॥ ૧૧૭॥

નાનાદિવ્યાસ્ત્રતેજઃ સ્ફુરદમિતભુજઃ શત્રુસંહારધીરઃ
કૌટિલ્યદ્યોતમાનભ્રુકુટિયુતમુખં ધારયન્નમ્બુદાભઃ ।
તૂણીરદ્યુસ્તવેગોલ્લસિતશરવરં તાડયિત્વા દશાસ્યં
વીરશ્રીબન્ધુરાઙ્ગસ્ત્રિદશપતિનુતઃ પાતુ માં વીરરામઃ ॥ ૧૧૮॥

જાતિભ્રષ્ટોઽપિ પાપી પરધનપરદારેષુ નિત્યોદ્યતો યઃ
    વાસ્તેયી બ્રહ્મહન્તા પિતૃવધનિરતો યોગિવૃન્દાપકારી ।
ધ્યેયં કર્ણામૃતં યઃ પઠતિ હિ સતતં રામચન્દ્રસ્ય ભક્તો
    યોગીન્દ્રૈરપ્યલભ્યં પદમપિ લભતે સર્વદેવૈશ્ચ સેવ્યમ્ ॥ ૧૧૯॥

## ચતુર્થાશ્વાસઃ

શ્રીરામં જનકાત્મજાકુચતટી શ્રીગન્ધપઙ્કોલ્લસદ્
    વક્ષોવીથિમુદારમાશ્રિતમુનિં પ્રાદુર્ભવત્કલ્પકમ્ ।
બ્રહ્મેશાનમુખામરસ્તુતમજં બ્રહ્માણ્ડભાણ્ડાધિપં
    વન્દે કોસલકન્યકાસુતમહં વારાશિગર્વાપહમ્ ॥ ૧॥

સાકેતે મણિનિર્મિતે પ્રવિલસત્સૌધાયુતાનાં શતે
    અન્તર્ગેહમતીતભાનુનિલયે ચઞ્ચત્પતાકોજ્જ્વલે ।
હર્મ્યે ભર્મઘણઙ્ઘણાઘનરવદ્ઘણ્ટાશતૈરાવૃતે
    દોલાતલ્પવિહારિણં રઘુપતિં સીતાસમેતં ભજે ॥ ૨॥

સાકેતે સૌધબદ્ધધ્વજશતમહિતે રાજમાર્ગે વિશાલે
    ઘણ્ટારાવૈરુપેતે કનકકુથયુતે ગન્ધનાગે વસન્તમ્ ।
વિદ્યાકલ્પોજ્જ્વલાઙ્ગં રથગજતુરગૈરાવૃતં સુપ્રસન્નં
    રામં શ્વેતાતપત્રાવૃતમુખકમલં ચિન્તયામ્યન્તરઙ્ગે ॥ ૩॥

સાકેતે મણિકોટિભિઃ સુખચિતે દિવ્યામ્બરાલઙ્કૃતે
    હેમસ્તમ્ભસહસ્રકોટિઘટિતે તારાપથાત્યુન્નતે ।
રમ્યસ્વર્ણમયે વિચિત્રભુવને દિવ્યન્તરિક્ષે મુદા
    રામં સ્મેરમુખામ્બુજં રઘુપતિં સીતાસમેતં ભજે ॥ ૪॥

સાકેતે મણિતોરણાઞ્ચિતલસદ્વીથીશતપ્રાઙ્ગણે
    સાનન્દં ભરતાદિભિઃ સહચરૈરત્યન્તમોદાન્વિતૈઃ ।
ક્રીડન્તં મણિકન્દુકૈઃ કરગતૈરન્યોન્યમત્યુજ્જ્વલૈઃ ।
    પૌરસ્ત્રીનયનોત્સવૈઃ પ્રતિદિનં પૂજ્યં ભજે રાઘવમ્ ॥ ૫॥

સાકેતે કનકાદ્રીશ◌ૃઙ્ગઘટિતે કલ્પદ્રુમૈરાવૃતે
    વૈડૂર્યાદિમણીન્દ્રકાન્તિઘટિતે દેવેન્દ્રનીલોજ્જ્વલે ।
કુર્વન્તં મણિનાયકં મણિગૃહે માણિક્યપીઠે ભજે

પુત્રૌ મન્મથસુન્દરૌ કુશલવૌ સંસેવ્યપાદાવિમૌ ॥ ૬॥

સાકેતે જનનીકરાર્પિતલસત્કસ્તૂરીકાસુન્દરે
ફાલે મૌક્તિકજાલકં શશિનિભં સ્વર્ણાઙ્કિતં વર્તુલમ્ ।
ચૂડાલમ્બમનોજ્ઞહારકલિતં બિભ્રાણમત્યુજ્જ્વલં
રામં કોસલપુત્રિકાવરસુતં સીતાસમેતં ભજે ॥ ૭॥

સાકેતે સરયૂજલેઽતિવિમલે પ્રોત્ફુલ્લપદ્માઙ્કિતે
દિવ્યશ્રી શતકોટિ નૃત્યરુચિરે સ્વર્ગાપગાસુન્દરે ।
પશ્યન્તીષુ સુરાઙ્ગનાસુ શપથં ક્રીડન્તમુર્વીસુતાં
બાહુભ્યાં વિમલોદકેન રુચિરં સીતાસમેતં ભજે ॥ ૮॥

કદા સુરતરુસ્થલે કનકમણ્ડપે પુષ્પકે
વરાસનમુપેયિવાન્ વસુદલારવિન્દોજ્જ્વલે ।
કરેણ હૃદયસ્પૃશા કલિતમુદ્રચિન્મુદ્રિકઃ
મમ સ્ફુટતુ વાસનામનિશમાત્તવીરાસનઃ ॥ ૯॥

નદીરમણબન્ધનં મતિમતામુદારં ધનં
જગદ્વિહિતરન્ધનં સકલકામનિષ્પન્દનમ્ ।
વિલિપ્તહરિચન્દનં વિનુતયાતસઙ્ક્રન્દનં
ભજામિ રઘુનન્દનં પવનનન્દનસ્યન્દનમ્ ॥ ૧૦॥

રક્તામ્ભોરુહલોચનં કુવલયશ્યામં કપોલે ધનુઃ
કોટિન્યસ્તકરામ્બુજં ધૃતતનુત્રાણં જટામણ્ડિતમ્ ।
જેતારં ખરદૂષણત્રિશિરસામાબદ્ધગોધાઙ્ગુલિ-
ત્રાણં માર્ગણપુર્ણતૂણયુગલં કોદણ્ડરામં ભજે ॥ ૧૧॥

શ્રીમત્કલ્પદ્રુમૂલે સકલમણિમયે મણ્ટપે પુષ્પકાખ્યે
તન્મધ્યે સૂર્યબિમ્બદ્યુતિસરસિરુહે શોભમાનેઽષ્ટપદ્મે ।
પશ્યન્નિષ્ટાં જનકતનયાં વામભાગોપસેવ્યાં
સૌમિત્રિં ભાનુપુત્રં પવનસુતયુતં પાતુ માં રામચન્દ્રઃ ॥ ૧૨॥

વિનીલજલદોપમં વિમલચન્દ્રબિમ્બાનનં
વિનિદ્રમણિકુણ્ડલં વિકચપુણ્ડરીકેક્ષણમ્ ।
વિભિન્ન દનુજાધિપં વિધૃતબાણબાણાસનં
વિભીષણવરપ્રદં વિજયરામમીડેઽનિશમ્ ॥ ૧૩॥

રાજદ્રાજીવનેત્રં રઘુકુલતિલકં રઞ્જિતાશેષલોકં
    વામાઙ્કાલોકિસીતં વરકરધનુષી કુણ્ડલોદ્દીપ્તગણ્ડમ્ ।
શ્યામં શાન્તં પ્રસન્નં દરહસિતમુખં વજ્રસિંહાસનસ્થં
    રામં રાજત્કિરીટં રવિશતવિશદં રાજરાજેશમીડે ॥ ૧૪॥

ભદ્રાં વ્યાખ્યાનમુદ્રાં કરસરસિરુહે દક્ષિણે ધારયન્તં
    સવ્યે જાનુન્યુદારં કરમપિ ચ મુદા ધારયન્તં સ્ફુરન્તમ્ ।
પશ્યન્તં વામભાગે કરધૃતકમલાં ચિત્રભૂષાવિશેષાં
    વૈદેહીં કાઞ્ચનાભાં સ્તનભરનમિતાં ભાવયે રામચન્દ્રમ્ ॥ ૧૫॥

વિબુધવિટપિમૂલે જાનકીલક્ષ્મણાભ્યાં
    સહિતમનિલવેગં બાણમાદાય ચાપમ્ ।
બહુશરપટુતૂણં રમ્યપુષ્પોપહારં
    વિબુધભરણચિત્તં ચિન્તયે રામચન્દ્રમ્ ॥ ૧૬॥

જાનાતિ રામ તવ સ્વામિગતિં હનૂમાન્ જાનાતિ રામ તવ સખ્યગતિં કપીશઃ ।
જાનાતિ રામ તવ યુદ્ધગતિં દશાસ્યો જાનાતિ રામ ધનદાનુજ એવ સત્યમ્ ॥

હે રામ હે રમણ હે જગદેકવીર હે નાથ હે રઘુપતે કરુણાલવાલ ।
હે જાનકીરમણ હે જગદેકબન્ધો માં પાહિ
    દીનમનિશં કૃપણં કૃતઘ્નમ્ ॥ ૧૮॥

અયોધ્યાનાથ રાજેન્દ્ર સીતાકાન્ત જગત્પતે ।
શ્રીરામ પુણ્ડરીકાક્ષ રામચન્દ્ર નમોઽસ્તુ તે ॥ ૧૯॥

દક્ષિણે લક્ષ્મણો ધન્વી વામતો જાનકી શુભા ।
પુરતો મારુતિર્યસ્ય તન્નમામિ રઘૂત્તમમ્ ॥ ૨૦॥

રામં રાક્ષસમર્દનં રઘુપતિં શક્રારિવિધ્વંસિનં
    સુગ્રીવેપ્સિત રાજ્યદં સુરપતેઃ પુત્રાન્તકં શાર્ઙ્ગિણમ્ ।
ભક્તાનામભયપ્રદં ભયહરં પાપૌઘવિધ્વંસિનં
    સીતાસેવિતપાદપદ્મયુગલં રામં ભજે શ્યામલમ્ ॥ ૨૧॥

ભવભયહરમેકં ભાનુકોટિપ્રકાશં
    કરધૃતશરચાપં કાલમેઘાવભાસમ્ ।
કનકરુચિરવસ્ત્રં રત્નવત્કુણ્ડલાઢ્યં
    કમલવિશદનેત્રં સાનુજં રામમીડે ॥ ૨૨॥

રામં શ્યામપયોદનીલમમલં રાજીવનેત્રં સદા-
ऽહલ્યાશાપનિવારણ પ્રણયપાદામ્ભોજમુર્વીશ્વરમ્ ।
વિદ્યુત્કોટિસહસ્રદીધિતિલસત્કોટીરમુક્તોજ્જ્વલં
ધ્યાયે તારકનામમીશ્વરસખં દૈતેયવંશાપહમ્ ॥ ૨૩ ॥

દશરથસુતમીશં દણ્ડકારણ્યવાસં
શતમખમણિનીલં જાનકીપ્રાણલોલમ્ ।
સકલભુવનમોહં સન્નુતામ્ભોદદેહં
બહુલનુતસમુદ્રં ભાવયે રામભદ્રમ્ ॥ ૨૪ ॥

સૂર્યતીરવને લતાનિવસને સદ્રત્નવેદીતટે
શ્રીપર્યઙ્કતલે વિદેહસુતયા સાર્ધં પરિક્રીડતા ।
કસ્તૂરીઘનસારચન્દનમિલદ્ગન્ધોલ્લસત્પાવની
પાયાન્મૂર્તિરનામયી રઘુપતેર્ભદ્રાત્મિકા નોऽનિશમ્ ॥ ૨૫ ॥

વૈદેહીપ્રિયવલ્લભં વિજયિનં વાતાત્મજાધીશ્વરં
વાણીવારિધિવાનરાદિવિનુતં વન્દારુમન્દારકમ્ ।
વિશ્વામિત્રવસિષ્ઠવાસવશિવાવાગીશશશ્વન્નુતં
દેવેશં વિનતાત્મજાભિવિનુતં વન્દે સદા રાઘવમ્ ॥ ૨૬ ॥

વિશાલનેત્રં પરિપૂર્ણગાત્રં સીતાકલત્રં સુરવૈરિજૈત્રમ્ ।
જગત્પવિત્રં પરમાત્મતન્ત્રં શ્રીરામચન્દ્રં પ્રણમામિ ચિત્તે ॥ ૨૭ ॥

સૌમિત્રિમાનાર્ણવપૂર્ણચન્દ્ર સીતાલસલ્લોચનપૂર્ણચન્દ્ર ।
સુરારિવક્ત્રામ્બુધિપુર્ણચન્દ્ર સંરક્ષ માં રાઘવ રામચન્દ્ર ॥ ૨૮ ॥

યસ્ય કિઞ્ચિદપિ નો હરણીયં કર્મ કિઞ્ચિદપિ નો ચરણીયમ્ ।
રામનામ ચ સદા સ્મરણીયં લીલયા ભવજલં તરણીયમ્ ॥ ૨૯ ॥

રિઙ્ગમાણમભિતો ગૃહાઙ્ગણે ભૃઙ્ગનીલમલકાવૃતાનનમ્ ।
મઙ્ગલપ્રદમમઙ્ગલાપહં સઙ્ગૃહાણ દશરથાત્મજં હૃદિ ॥ ૩૦ ॥

દનુજતિમિરભાનું તાપસૈશ્ચિન્ત્યમાનં
શમિતકલુષચારં સેવકે દુષ્ટદૂરમ્ ।
દલિતવિષમસાલં દણ્ડિતારાતિજાલં
પ્રણમ શિખરિશત્રું ભવ્યપાથોદગાત્રમ્ ॥

હે ગોપાલક હે દયાકરનિધે હે શમ્ભુચાપાકૃવૃત્ તે

હે દૈત્યાન્તક હે વિભીષણદયાપારીણ હે ભૂપતે ।
હે વૈદેહસુતામનોજ્ઞવિહૃતે હે કોટિમારાકૃતે
હે નવ્યામ્બુજનેત્ર પાલય પરં જાનામિ ન ત્વાં વિના ॥ ૩૨॥

સાકેતે પ્રણવાબ્જરત્નખચિતે સિંહાસને સંસ્થિતં
વિશ્વામિત્રવસિષ્ઠગાલવમુખૈરાશીર્ભિરામોદિતમ્ ।
પૂજ્યં પાર્શ્વગતાબ્જચારુનયનં વિદ્યુચ્ચલચ્ચામરં
વન્દે કોમલસંસ્મિતાનનમિલારક્ષાવતીર્ણં હરિમ્ ॥ ૩૩॥

નિત્યં નિર્જિતપઙ્કસમ્ભવમહોનેત્રશ્રિયં રાઘવં
રામં પર્વણિ ચન્દ્રચારુવદનં દિક્પાલકૈઃ સેવિતમ્ ।
કર્પૂરાગરુ ચન્દનાર્દ્ર હૃદયં મન્દારમાલાઙ્કિતં
વિદ્યુત્પુઞ્જનિભામ્બરાવૃતતનું રામં ભજે શ્યામલમ્ ॥ ૩૪॥

શ્રીરામં કુશિકાત્મજસ્ય વચનેનાકૃષ્ય બાણાસનં
મારીચં ચ સુબાહુકં શરયુગેનૈવાહવે લીલયા ।
કાન્તં સુન્દરકાકપક્ષરુચિરં સૌમિત્રિણા સંસ્તુતં
પશ્યામઃ કમલામુખે સકરુણં કાલામ્બુદશ્યામલમ્ ॥ ૩૫॥

આનન્દરૂપં વરદં પ્રસન્નં સિંહાસને સેવિતપારિજાતમ્ ।
નીલોત્પલાઙ્ગં ભુવનૈકમિત્રં રામં ભજે રાઘવરામચન્દ્રમ્ ॥ ૩૬॥

યુદ્ધે વસન્તમૃદુરદ્ભુતબાણવર્ષૈ
રામઃ પ્રહારસમયે રજનીચરાણામ્ ।
રક્ષાનુકૂલસમયાય વિભીષણાય
લઙ્કાધિપત્યમદિશદ્રઘુરામચન્દ્રઃ ॥ ૩૭॥

વેદાન્તનાદં સુકૃતૈકદાસં હતાભિમાનં ત્રિદશપ્રધાને ।
ગજેન્દ્રયાનં વિગતાવસાનં શ્રીરામચન્દ્રં સતતં નમામિ ॥ ૩૮॥

શ્રીરામચન્દ્રં ધૃતચાપસાયકં નીલોત્પલાભં નલિનાયતેક્ષણમ્ ।
સૌમિત્રિણા સેવિતપાદપઙ્કજં સીતાસમેતં શરણં ભજેઽહમ્ ॥ ૩૯॥

શ્રીરામચન્દ્ર કરુણાકર દીનબન્ધો
સીતાસમેત ભરતાગ્રજ રાઘવેશ ।
પાપાર્તિભઞ્જન ભયાતુરદીનબન્ધો
પાપામ્બુધૌ પતિતમુદ્ધર મામનાથમ્ ॥ ૪૦॥

ઇદં શરીરં શતસન્ધિજર્જરં
    પતત્યવશ્યં પરિણામદુર્લભમ્ ।
કિમૌષધં પૃચ્છસિ મૂઢ દુર્મતે
    નિરામયં રામકથામૃતં પિવ ॥ ૪૧॥

દશમુખગજસિંહં દૈત્યગર્વાદરંહં
    કદનભયદહસ્તં તારકબ્રહ્મશસ્તમ્ ।
મણિખચિતકિરીટં મઞ્જુલાલાપનાદં
    દશરથકુલચન્દ્રં રામચન્દ્રં ભજેઽહમ્ ॥ ૪૨॥

લઙ્કાવિરામં રણરઙ્ગભીમં રાજીવનેત્રં રઘુવંશમિત્રમ્ ।
કારુણ્યમૂર્તિં કરુણાપ્રપૂર્તિં શ્રીરામચન્દ્રં શરણં પ્રપદ્યે ॥ ૪૩॥

શ્રીરામચન્દ્રમનિશં હૃદિસ્થિતં શ્રીરામમિન્દુવદનં પ્રવિભાસમ્ ।
ભાવયામિ નિગમાન્તનિવાસં ભારતીપતિનુતં ભવવન્દ્યમ્ ॥ ૪૪॥

કૌમારે રામચન્દ્રઃ કમલમૃદુપદા શોભયન્ ભૂમિભાગં
    માતુશ્ચાનન્દકારી મરકતનિકરાકાર ઇન્દીવરાક્ષઃ ।
ઉત્સઙ્ગે સન્નિવિષ્ટઃ પિતુરમરવરૈઃ સ્તૂયમાનોપકારી
    નાનાલઙ્કારભૂષઃ સ્ફુરતુ મમ સદા માયયા રામ ઈશઃ ॥ ૪૫॥

સન્નદ્ધઃ કવચી ખડ્ગી ચાપબાણધરો યુવા ।
ગચ્છન્મમાગ્રતો નિત્યં રામઃ પાતુ સલક્ષ્મણઃ ॥ ૪૬॥

સુગ્રીવમિત્રં પરમં પવિત્રં સીતાકલત્રં નવહેમસૂત્રમ્ ।
કારુણ્યપાત્રં શતપત્રનેત્રં શ્રીરામચન્દ્રં શિરસા નમામિ ॥ ૪૭॥

શ્રીરાઘવેતિ રમણેતિ રઘૂદ્વહેતિ
    રામેતિ રાવણહરેતિ રમાધવેતિ ।
સાકેતનાથ સુમુખેતિ ચ સુવ્રતેતિ
    વાણી સદા વદતુ રામ હરે હરેતિ ॥ ૪૮॥

જયતુ જયતુ રામો જાનકીવલ્લભોઽયં
    જયતુ જયતુ રામશ્ચન્દ્રચૂડાર્ચિતાઙ્ઘ્રિઃ ।
જયતુ જયતુ વાણીનાથનાથઃ પરાત્મા
    જયતુ જયતુ રામો નાથનાથઃ કૃપાલુઃ ॥ ૪૯॥

વરં ન યાચે રઘુનાથ યુષ્મત્પાદાબ્જભક્તિઃ સતતં મમાસ્તુ ।

ઇદં પ્રિયં નાથ વરં પ્રયચ્છ પુનઃ પુનસ્ત્વામિદમેવ યાચે ॥ ૫૦॥

અમ્ભોધિરોષૈરરુણાયમાને નાથસ્ય મૃષ્ટ્વા નયને રઘૂણામ્ ।
મરુદ્ગણૈસ્તત્ક્ષણમાનુશઙ્કે મન્દાકિનીમઙ્ગલસૂત્રભઙ્ગઃ ॥ ૫૧॥

અમ્ભોધિસ્મયબન્ધનેન જગદાનન્દેન ભૂપુત્રિકા-
    સ્વાન્તામ્ભોભવબાન્ધવેન નતરક્ષાયત્તચિત્તેન મે ।
કર્ણાલમ્બિતકુણ્ડલેન દિવિષાત્ત્રાણોદ્યમેનાશ્રિત-
    શ્રેયઃ કલ્પલતેવ મે મતિરિયં રામેણ સંવર્ધતામ્ ॥ ૫૨॥

રામાદૌ જનનં કુમારગમનં યજ્ઞપ્રતીપાલનં
    શાપાદુદ્ધરણં ધનુર્વિદલનં સીતાઙ્ગનોદ્વાહનમ્ ।
લઙ્કાયા દહનં સમુદ્રતરણં સૌમિત્રિસમ્મોહનં
    રક્ષઃ સંહરણં સ્વરાજ્યભવનં ચૈતદ્ધિ રામાયણમ્ ॥ ૫૩॥

જન્માદૌ ક્રતુરક્ષણં મુનિપતેઃ સ્થાણોર્ધનુર્ભઞ્જનં
    વૈદેહીગ્રહણં પિતુશ્ચ વચનાદ્ઘોરાટવીગાહનમ્ ।
કોદણ્ડગ્રહણં ખરાદિમથનં માયામૃગચ્છેદનં
    બદ્ધાબ્ધિક્રમણં દશાસ્યનિધનં ચૈતદ્ધિ રામાયણમ્ ॥ ૫૪॥

પૂર્વં રામતપોવનાનુગમનં હત્વા મૃગં કાઞ્ચનં
    વૈદેહીહરણં જટાયુમરણં સુગ્રીવસમ્ભાષણમ્ ।
બાલીનિગ્રહણં સમુદ્રતરણં લઙ્કાપુરીદાહનં
    પશ્ચાદ્રાવણકુમ્ભકર્ણકદનં ચૈતદ્ધિ રામાયણમ્ ॥ ૫૫॥

શાન્તં શારદચન્દ્રકોટિસદૃશં ચન્દ્રાભિરામાનનં
    ચન્દ્રાર્કાગ્નિવિકાસકુણ્ડલધરં ચન્દ્રાવતંસસ્તુતમ્ ।
વીણાપુસ્તકસાક્ષસૂત્રવિલસદ્વ્યાખ્યાનમુદ્રાકરં
    દેવેશં ભરતાદિભિઃ પરિવૃતં રામં ભજે શ્યામલમ્ ॥ ૫૬॥

કૃષ્ટે ભીમધનુઃ કઠોરનિનદં બ્રહ્માદિસંવિત્સ્મયં
    ભાસ્વદ્વાજિગતેન માર્ગમનિશં શામ્ભોઃ શિરઃ કમ્પનમ્ ।
દિગ્દન્તિસ્ખલનં કુલાદ્રિચલનં સપ્તાર્ણવોન્મીલનં
    વૈદેહીમદનં મદાન્ધદમનં ત્રૈલોક્યસમ્મોહનમ્ ॥ ૫૭॥

કઞ્જાતપત્રાયતલોચનાય કર્ણાવતંસોજ્જ્વલકુણ્ડલાય ।
કારુણ્યપાત્રાય સુવંશજાય નમોઽસ્તુ રામાય સલક્ષ્મણાય ॥ ૫૮॥

વિદ્યુન્નિભામ્ભોદસુવિગ્રહાય વિદ્યાધરૈઃ સંસ્તુતસદ્ગુણાય ।
વીરાવતારાય વિરાધહન્ત્રે નમોઽસ્તુ રામાય સલક્ષ્મણાય ॥ ૫૯॥

સંસક્તદિવ્યાયુધકાર્મુકાય સમુદ્રગર્વાપહરાયુધાય ।
સુગ્રીવમિત્રાય સુરારિહન્ત્રે નમોઽસ્તુ રામાય સલક્ષ્મણાય ॥ ૬૦॥

પીતામ્બરાલઙ્કૃતમધ્યકાય પિતામહેન્દ્રામરવન્દિતાય ।
પિત્રે સ્વભક્તસ્ય જનસ્ય માત્રે નમોઽસ્તુ રામાય સલક્ષ્મણાય ॥ ૬૧॥

નમો નમસ્તેઽખિલપૂજિતાય નમો નમશ્ચન્દ્રનિભાનનાય ।
નમો નમસ્તે રઘુવંશજાય નમોઽસ્તુ રામાય સલક્ષ્મણાય ॥ ૬૨॥

ઇમાનિ પઞ્ચરત્નાનિ ત્રિસન્ધ્યં યઃ પઠેન્નરઃ ।
સર્વપાપવિનિર્મુક્તઃ સ યાતિ પરમાં ગતિમ્ ॥ ૬૩॥

શ્રીરામઃ કલ્પવૃક્ષો મે વિરામઃ સકલાપદઃ ।
અભિરામસ્ત્રિલોકાનાં રામઃ ક્ષેમં કરોતુ નઃ ॥ ૬૪॥

હૃદયસદયચિત્તં ચિત્તનાથં ગુણાનાં
    ઉદધિમુદિતનિમ્નં નિમ્નગાલઙ્કૃતાઙ્ઘ્રિમ્ ।
જનકપતિતનુજાસ્વાન્તકાન્તોત્પલસ્ય
    સ્ફુરણકરણચન્દ્રં રામચન્દ્રં ભજેઽહમ્ ॥ ૬૫॥

વદતુ વદતુ વાણી રામ રામેતિ નિત્યં
જપતુ જપતુ નિત્યં રામપાદારવિન્દમ્ ।
વદતુ વદતુ દેહઃ ચિન્તયેદ્રામચન્દ્રં
ન ભવતુ મમ પાપં જન્મજન્માન્તરેષુ ॥

ચાપબાણધરઃ સીતાકામદઃ કાન્તિમાન્નરઃ ।
સીતાલક્ષ્મણસંયુક્તઃ પાતુ માં રાઘવેશ્વરઃ ॥ ૬૭॥

પ્રાતઃ સ્મરામિ રઘુનાથમુખારવિન્દં
    મન્દસ્મિતં મધુરાભાષિ વિશાલભાલમ્ ।
કર્ણાવલમ્બિચલકુણ્ડલગણ્ડભાગં
    કર્ણાન્તદીર્ઘનયનં નયનાભિરામમ્ ॥ ૬૮॥

પ્રાતર્ભજામિ રઘુનાથપદારવિન્દં
    રક્ષોગણાય ભયદં વરદં નિજેભ્યઃ ।
યદ્રાજસંસદિ વિભિદ્ય મહેશચાપં

સીતાકરગ્રહણમઙ્ગલમાપ સદ્યઃ ॥ ૬૯॥

પ્રાતર્નમામિ રઘુનાથપદારવિન્દં
પદ્માઙ્કુશાદિશુભરેખશુભાવહં મે ।
યોગીન્દ્રમાનસમધુવ્રતસેવ્યમાનં
શાપાપહં સપદિ ગૌતમધર્મપત્ન્યાઃ ॥ ૭૦॥

પ્રાતર્વદામિ વચસા રઘુનાથનામ
વાગ્દોષહારિ સકલં કલુષં નિહત્ય ।
યત્પાર્વતી સ્વપતિના સહ ભોક્તુકામા
પ્રીત્યા સહસ્રહરિનામસમં જજાપ ॥

પ્રાતઃ શ્રયે શ્રુતિનુતાં રઘુનાથમૂર્તિં
નીલામ્બુદોત્પલસિતેતરરત્નનીલામ્ ।
આમુક્તમૌક્તિકવિશેષવિભૂષણાઢ્યાં
ધ્યેયાં સમસ્તમુનિભિર્નિજભૃત્યમુખ્યૈઃ ॥ ૭૨॥

યઃ શ્લોકપઞ્ચકમિદં નિયતઃ પઠેત
નિત્યં પ્રભાતસમયે પુરુષઃ પ્રબુદ્ધઃ ।
શ્રીરામકિઙ્કરજનેષુ સ એવ મુખ્યો
ભૂત્વા પ્રયાતિ હરિલોકમનન્યલભ્યમ્ ॥ ૭૩॥

કિં મન્ત્રૈર્બહુભિશ્ચ દુષ્કરફલૈરાયાસદૈસ્તદ્વિદાં
કિઞ્ચિલ્લોપવિધાનમાત્રવિફલૈઃ સંસારદુઃખાવહૈઃ ।
એકઃ સન્નપિ સર્વમન્ત્રફલદો દોષોજ્ઝિતઃ સર્વદા
શ્રીરામઃ શરણં મમેતિ પરમો મન્ત્રોઽયમષ્ટાક્ષરઃ ॥ ૭૪॥

રામભદ્રાશ્રયઃ સાક્ષાદ્રામચન્દ્રો ન સંશયઃ ।
તત્ર કોદણ્ડતૂણીરાવત્ર દણ્ડકમણ્ડલૂ ॥ ૭૫॥

રઘુનાથ પદારવિન્દયોસ્તે ભ્રમરીભૂતમદાન્ધકારસૂર્યઃ ।
અપરાધશતાલયં કલૌ મામવગૃહ્ણાતિ હિ મઙ્ગલૈઃ કટાક્ષૈઃ ॥ ૭૬॥

રામનામ તવ નામ જપન્તઃ પામરા અપિ તરન્તિ ભવાબ્ધિમ્ ।
અઙ્ગસઙ્ગિભવદઙ્ગુલિમુદ્રઃ કિં વિચિત્રમતરત્કપિરબ્ધિમ્ ॥ ૭૭॥

શ્રીરામનામામૃતમન્ત્રબીજં સઞ્જીવનં ચેન્મનસિ પ્રતિષ્ઠમ્ ।
હાલાહલં વા પ્રલયાનલં વા મૃત્યોર્મુખં વા વિતથીકરોતિ ॥ ૭૮॥

હા કૃષ્ણાચ્યુત હા કૃપાલય હરે હા પાણ્ડવાનાં સખે
ક્વાસિ ક્વાસિ સુયોધનાવરગતાં હા રક્ષ માં દ્રૌપદીમ્ ।
ઇત્યુક્તૌ ક્ષયવસ્ત્રરક્ષણતનુર્યોઽરક્ષદાશુ ક્ષણે-
નાર્ત્તત્રાણપરાયણઃ સ ભગવાન્નારાયણો મે ગતિઃ ॥ ૭૯॥

ઇન્દીવરદલશ્યામમિન્દુકોટિ નિભાનનમ્ ।
કન્દર્પકોટિલાવણ્યં વન્દેઽહં રઘુનન્દનમ્ ॥ ૮૦॥

કિં યોગશાસ્ત્રૈઃ કિમશેષવિદ્યયા
કિં યાગગઙ્ગાદિવિશેષતીર્થૈઃ ।
કિં બ્રહ્મચર્યાશ્રમસઞ્ચરેણ
ભક્તિર્નચેત્તે રઘુવંશકીર્ત્યામ્ ॥ ૮૧॥

હે રામ ભદ્રાશ્રય હે કૃપાલો હે ભક્તલોકૈકશરણ્યમૂર્તે ।
પુનીહિ માં ત્વચ્ચરણારવિન્દં જગત્પવિત્રં શરણં મમાસ્તુ ॥ ૮૨॥

હે રામ ભદ્રાશ્રય યોગિચન્દ્ર પ્રસન્નમૂર્તૌ પરિદૃશ્યમાને ।
તાપત્રયં નાશમુપૈતિ પુંસાં મમાન્ધકારં વિનિહન્તુ નદ્યઃ ॥ ૮૩॥

નીલાભ્રવૃન્દ નિખિલેશ જગન્નિવાસ
રાજીવનેત્ર રમણીય ગુણાભિરામ ।
શ્રીરામ દૈત્યકુલમર્દન રામચન્દ્ર
ત્વત્પાદપદ્મમનિશં કલયામિ ચિત્તે ॥ ૮૪॥

કુવલયદલનીલઃ પીતવાસાઃ સ્મિતાસ્યો
વિવિધરુચિરભૂષાભૂષિતો દિવ્યમુર્તિઃ ।
દશરથકુલનાથો જાનકીપ્રાણનાથો
નિવસતુ મમ ચિત્તે સર્વદા રામચન્દ્રઃ ॥ ૮૫॥

સજલજલદનીલં સન્મુનિસ્તુત્યલીલં
સુગમનિગમમૂલં યાતુધાનાન્તકાલમ્ ।
દશરથનૃપબાલં સત્કૃપાપૂર્ણલીલં
ભજતુ ભુવનખેલં ભક્તસંસ્તુત્યશીલમ્ ॥ ૮૬॥

દશરથવરપુત્રં જાનકીસત્કલત્રં
દશમુખહરદક્ષં પદ્મપત્રાયતાક્ષમ્ ।
કરધૃતશરચાપં ચારુમુક્તાકલાપં

રઘુકુલનૃપવર્ય રામમીડે શરણ્યમ્ ॥ ૮૭॥

રામં વીરાસનસ્થં વિમલરવિનિભં ભાસમાનસ્વરૂપં
શ્યામં સીતાસમેતં સ્મિતરુચિરમુખં કુણ્ડલોદ્દીપ્તગણ્ડમ્ ।
શ્રીવત્સં શ્રીનિવાસં સુરવિટપિતટન્યસ્તસિંહાસનસ્થં
દિવ્યાકલ્પોજ્જ્વલાઙ્ગં દિવિજપતિનુતં ધ્યાનયજ્ઞેન યક્ષ્યે ॥ ૮૮॥

શ્રીરામભદ્રાશ્રયસદ્ગુરૂણાં પાદારવિન્દં ભજતાં નરાણામ્ ।
આરોગ્યમૈશ્વર્યમનન્તકીર્તિં અન્તે ચ વિષ્ણોઃ પદમસ્તિ સત્યમ્ ॥ ૮૯॥

રણહતદનુજેન્દ્રો રાજરાજાત્મચન્દ્રઃ
સમદરિપુમૃગેન્દ્રઃ સન્મનોઽમ્ભોધિચન્દ્રઃ ।
લલિતઘનનગેન્દ્રો લક્ષ્મણાનન્દસાન્દ્રો
મહિતસુજનચન્દ્રો મૈથિલીપ્રાણચન્દ્રઃ ॥ ૯૦॥

નમઃ કોદણ્ડહસ્તાય સન્ધીકૃતશરાય ચ ।
દણ્ડિતાખિલદૈત્યાય રામાયાપન્નિવારિણે ॥ ૯૧॥

ન જાનન્ જાનકીજાનૌ રામે તત્ત્વમપિ પ્રભૌ ।
ધિક્ કુર્યાદ્યમદૂતાન્ સ યો નરસ્તત્ત્વમીહતે ॥ ૯૨॥

રામો મે હૃદિ સન્નિધિં રમયતાં રામં ભજે દુષ્કૃતં
રામેણાપહૃતં નમો ભગવતે રામાય રામાચ્છુભમ્ ।
વક્ષ્યે શ્રીરઘુનન્દનસ્ય સુકૃતેર્દાસોસ્મ્યહં સર્વદા
નિત્યં કોસલકન્યકાપ્રિયસુતે રામે મનો વર્તતામ્ ॥ ૯૩॥

કોદણ્ડનિર્મુક્તશરાગ્રખણ્ડનં પ્રચણ્ડવિષ્વગ્ભુજદણ્ડમણ્ડનમ્ ।
પ્રચણ્ડચણ્ડાંશુસમાનમણ્ડનં ભજામિ રામં રણરઙ્ગમણ્ડનમ્ ॥ ૯૪॥

સિંહાસનસ્થં મુનિસિદ્ધસેવ્યં રક્તોત્પલાલઙ્કૃતપાદપદ્મમ્ ।
સીતાસમેતં શશિસૂર્યનેત્રં રામં ભજે રાઘવરામચન્દ્રમ્ ॥ ૯૫॥

દયારૂપે ભૂપે રઘુકુલકલાપે સુહૃદયે
ભુજસ્તમ્ભે દમ્ભેતરવિજયગુમ્ભે વિહરતામ્ ।
મહાવીરે ધીરે દશરથકુમારે પરિસરદ્
ગુણારામે રામે દશમુખવિરામે મમ મનઃ ॥ ૯૬॥

ગતેષ્વનેકેષુ ભવેષુ પાપવ્રતેષ્વમૂર્તેષુ ન યોગિતીર્થૈઃ ।
વિત્રસ્તસર્વેષુ નૃણાં કુલેશે સઞ્જાયતે ભક્તિરનન્તમીડે ॥ ૯૭॥

શ્રીરામભદ્રાશ્રિતયોગિવર્ય
પાદાબ્જયુગ્મં સતતં ભજેઽહમ્ ।
યચ્ચક્ષુષી ધામ જનપ્રવેશં
તચ્ચક્ષુષી પશ્યતિ યસ્ય ચેતઃ ॥ ૯૮॥

ન ગ્રસ્તસ્તમસા ન ચાક્ષિ મલિનો દર્શેન નો કર્શિતો
નૈવાસ્તં ગતવાન્ ન ચાઙ્કિતતનુર્નો પાક્ષિકશ્રીરપિ ।
લોકાલોકનગેન્દ્રલઙ્ઘનવિધૌ નો પઙ્ગુભાવઙ્ગતો
નિર્દોષો ગુણસાગરદ્રઘુપતેસ્તેજો યશશ્ચન્દ્રમાઃ ॥ ૯૯॥

નાગાનામયુતં તુરઙ્ગનિયુતં સાર્થં રથાનાં શતં
પાદાતાઃ શતકોટિયુદ્ધદલિતા નૃત્યત્કબન્ધો રણે ।
એવં કોટિસહસ્રનર્તનવિધૌ ચઞ્ચચ્ચલદ્ધણ્ટિકા
યામાર્ધં પરમાત્મનો રઘુપતેઃ કોદણ્ડઘણ્ટારવઃ ॥ ૧૦૦॥

ભજેહં સદા રામમિન્દીવરાભં ભવારણ્યદાવાનલાભાભિધેયમ્ ।
ભવાનીહૃદા ભાવિતાનન્દરૂપં ભવાભાવહેતું ભવાનીપ્રસન્નમ્ ॥ ૧૦૧॥

સુરાનીક દુઃખૌઘનાશૈક હેતું નરાકારદેહં નિરાકારમીડ્યમ્ ।
પરેશં પરાનન્દરૂપં વરેણ્યં હરિં રામમીશં ભજે ભારનાશમ્ ॥ ૧૦૨॥

પ્રપન્નાખિલાનન્દદોહપ્રપન્નં પ્રપન્નાર્તિનિઃશેષનાશાભિધાનમ્ ।
તપોયોગયોગીશભાવાભિભાવ્યં કપીશાદિમિત્રં ભજે રામચન્દ્રમ્ ॥ ૧૦૩॥

સ્ફુરદ્રત્નકેયૂર હારાભિરામં
ધરાભારભૂતાસુરાનીકદાવમ્ ।
શરચ્ચન્દ્રવક્ત્રં લસત્પદ્મનેત્રં
દુરાસાદ્યપારં ભજે રામચન્દ્રમ્ ॥ ૧૦૪॥

સુરાધીશનીલાભનીલાઙ્ગકાન્તિં વિરાધાદિરક્ષોગણાનીકનાશમ્ ।
કિરીટાદિશોભં પુરારાતિલાભં ભજે રામચન્દ્રં રઘૂનામધીન્દ્રમ્ ॥ ૧૦૫॥

લસચ્ચન્દ્રકોટિપ્રકાશાદિ પીઠે
સમાસીનમઙ્કે સમાદાય સીતામ્ ।
સ્ફુરદ્ધેમવર્ણાં લસત્કઞ્જપુઞ્જાં
ભજે રામચન્દ્રં નિવૃત્ત્યાદિતન્ત્રમ્ ॥ ૧૦૬॥

સદા ભોગભાજાં સુદૂરે વિભાન્તં મુદા યોગભાજામદૂરે વિભાન્તમ્ ।
ચિદાનન્દકન્દં સદા રાઘાવેશં વિદેહાત્મજાનન્દકન્દં પ્રપદ્યે ॥ ૧૦૭॥

મહાયોગમાયાવિશેષાનુયુક્તો વિભાસીશ લીલાનરાકારવૃત્તિઃ ।
ત્વદાનન્દલીલાકથાપૂર્ણકણ્ઠાઃ સદાનન્દરૂપા ભવન્તીહ લોકે ॥ ૧૦૮॥

યસ્ય પ્રાણનિવારણાવનકૃતે સ્યાતાં નિદાનૌ વિભોઃ
    ઐન્દ્રધ્વાઙ્ક્ષપતેઃ કૃપાજલનિધૌ કોપપ્રસાદૌ મુદે ।
ભૂયાદ્વાસવનીલસન્નિભતનુર્વામાઙ્કસેવ્યદ્વધૂઃ
    સોઽયં દુષ્ટનિશાટપાટનપટુઃ શ્રીરાઘવો નઃ સદા ॥ ૧૦૯॥

દૃષ્ટો વા કલુષાત્મકોઽપિ પિશુનો દુર્માર્ગસઞ્ચારિ વા
    માતૃઘ્નોઽપિ પિતૃઘ્નવર્તનરતઃ સન્મૌનિનિન્દાપરઃ ।
યોઽયં સ્મૃત્યમૃતં તથા મધુરસં વક્તા ચ શ્રેતા લિખેત્
    સ પ્રાપ્નોતિ નિરન્તરૈહિકસુખં નિર્વાણ સૌખ્યં તતઃ ॥ ૧૧૦॥

ઇતિ શ્રીરામકર્ણામૃતં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shrirama Karnamritam*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*